# BULLETIN OF THE
# GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS

## VOLUME XXI

அரசினர் கீழ்த்திசைச் சுவடி நூலகப் பருவ வெளியீடு.


**Edited by :**

**C. R. VITTOBABU**

**Assistant Director of Collegiate Education, Madras-6.**

**and**

**Curator-in-charge, Government Oriental Manuscripts Library,**
**Madras-5.**



1976

# BULLETIN OF THE

# GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS

## VOLUME XXI

அரசினர் கீழ்த்திசைச் சுவடி நூலகப் பருவ வெளியீடு.

**Edited by :**


C. R. VITTOBABU

Assistant Director of Collegiate Education, Madras-6.

and

Curator-in-charge, Government Oriental Manuscripts Library,

Madras-5.



1976

Published under the Authority of the Government of Tamil Nadu

© Government of Tamil Nadu.

Subscription : Rs. 10/- per volume for India
£ 1.00 or
$ 2-50 cents or its equivalent for
foreign countries.

Printed at the Rathnam Press, Madras-600 001.

# GENERAL EDITOR'S NOTE

The twenty first Volume of the Bulletin of the Government Oriental Manuscripts Library, Madras is brought out far behind the scheduled time, owing to various administrative and technical reasons and for which I crave the indulgence of the numerous subscribers and readers.

This Volume contains works in Sanskrit, Telugu, Malayalam, Persian and Tamil languages.

**Sanskrit section**

The Sanskrit section deals with the commentary of "Adhikāra-sangraha" (D. 15640) by Śrībhāṣyam Śrīnivāsācārya of the Kauśika ./.

Sri Vedānta Deśika had, out of great compassion for the common man, composed the "Rahasyatrayasāra" in 32 sections, bringing out the quintessence of the Sanskrit and Tamil Vedāntas. The 32 sections of this work embody the 32 Brahmavidyās enunciated in the Upaniṣads. Following the traditional teachings of earlier preceptors, Śrī Deśika explains in this work, the real nature, form, virtues, glories etc., of the Lord, His being the characterised by the sentient and insentient entities, His being the means as well as the end of all human endeavour, His assuming different manifestations such as para, vyūha, vibhava, antaryāmin and arcā with a view to dower upon men all that is aspired for by them, and His being the sole repository of innumerable auspicious qualities like easy accessibility and compassion.

In each section, Deśika has given both at the beginning and the end, two verses in Sanskrit, and a Tamil stanza at the end, summarising the topics dealt with in that particular section. Deśika collected these Sanskrit verses under the name "Adhikārasaṅgraha"

to facilitate daily recitation. Likewise, a colltion of all the Tamil stanzas found in this work enjoys the title, " Adhikārasaṅgraha" and forms a separate work by itself.

Five manuscripts of the Sanskrit text of 'Adhikārasaṅgraha" and nine manuscripts of commentaries on it a available in this Library. The work under the present publicatio has been jointly edited by Prof. R. N. Sampath (Ex-Curator) nd this Library Sanskrit Pandit T. A. K. Venkatachariar.

**Telugu section**

The Telugu section speaks about "The Rādhāmādhavasamāgama", a poem in Telugu by Eḍavalli Veṅkaṭakavi, based on the Rādhā-kṛṣṇa episode.

The Rādhāmādhava love is an example of " Madh ra-bhakti" through which a devotee derives bliss from the conviction that they are Divine Lovers and parents of the Universe; sometimes the devotee places himself in the position of a bride of the Lord and dervies the joy. This concept of bridal mysticism which is another aspect of the Madhurabhakti, was quite well known to the South Indian saints like Āḻvārs and Nāyanmārs and also to North Indian saints like Mīrā and Caitanya.

In Telugu, there are many poems dealing with the Rādhā—Mādhava love, such as Rādhikā-sāntvana of Muddu Paḷani, Rādhāmādhavam of Rādhāmādhavakavi alias Ellanārya and Rādhā-mādhavasamvādam of Velidiṇḍla Veṅkaṭapati.

The present work " Rādhāmādhavasamāgama ", therefore, is perhaps not new in its theme; still the approach of the author is refreshingly new; and strikingly original. The author seems to be quite aware of the objectionable nature of Rādhāmādhava relationship, since the former happened to be the latter's paternal aunt. So as to clear this relationship of this blemish, the author, out of a stroke of ingenuity, introduced the story of a nymph

Hariharinī as the previous incarnation of Rādha. This innovation helped the story to a large extent. Even in introducing the story the author has been very careful and brief to the point, overpowering as it were, the desire for a detailed to very detailed account of the story which an ordinary poet would naturally attempt in these cases. This sort of oracular brevity observed by the poet has imparted a sense of serious nature to the whole situation, thus making the "Rādhāmādhava samāgama" more sensible and reasonable.

The style of the author is simple and lucid; and he has a laxity for rules of grammar and prosody. On the whole the author presents the well known Rādhāmādhava love theme, in a refreshingly original manner by making certain bold innovations in the otherwise beaten track, which indeed speaks very high of him, who lived in an age of Telugu poetry which generally lacked in originality of thought and expression. This work has been edited by this Library Telugu Pandit T. Sridharamurthy.

## Malayalam section

The Malayālam section refers to the four Malayālam records in the Mackenzie collections preserved in this Library. The first record is a public notification issued by Thomas Daden, the Collector of Malabar in the year 1809. He exhorts the people of Malabar to surrender the ancient records in their possessions in favour of Col. Mackenzie. The second document relates the conferring of certain titles to a family and the eventual disruption it causes among two brothers. The third record also speaks of certain individuals and families receiving titles. The last piece reports the special privileges enjoyed by a community of goldsmiths which was entrusted with the job of making a coin called "Vīrarāyanpaṇam" for Zamorin, the ruler of Calicut. These records have been edited by Thiru. M. P. Mukundan, retired Sanskrit Pandit of this Library.

## Islamic section

The Islamic section gives descriptions of two persian works namely (1) Chaman-i-lataif and (2) Masnavi-i-Jawhar.

*Chaman-i-Lataif:* This work is based on a Persian manuscript preserved in this Library under No. D. 128. This Collection of penegyrics by Quadir Hussain Naguri is dedicated to Nawab—Ghulam Ghouse Khan Bahadur, the last Nawab of Carnatic that had some power and importance. He was also a patron of learning and his biographies and short accounts of the poets of Southern India "Tazkira-i-Gulzara-i-Azam" is really valuable. This masnavi contains mainly eulogies on Nawab Ghulam Ghose Khan and Nawab Azeemjah Bahadur. This masanavi was composed in the year 1256 A.H.

*Masnavi-i-Jawhar:* This is based on a Persian manuscript preserved in this Library under No. D. 106. This poem was composed on the occasion of the wedding of Nawab Ghulam Muhammad Ghouse Khan Bahadur (1855–1841 A.H.) the last Nawab of Carnatic. One of the court poets with the pen name "Jawhar" composed this poem in a very beautiful style. He describes all the Ceremonies that took place on the day of Wedding in an elegant manner. In the end Chronograms of seven famous poets of that time have been given. This Masnavi was composed in the year 1264 A.H. Both the above Persian works have been edited by Thiru Syed Hamza Husain Omari (Former Urdu Pandit of this Library and present Asst. Prof. of Urdu, Govt. Arts College, Nandanam, Madras.)

## Tamil section

The Tamil section carries a rare and hitherto unpublished work "Prabandhamarapiyal" (R. 411) dealing with the nature of the prabandhas or minor poems in Tamil. It was written in the 16th Century. The treatise consists of 35 Verses in the "nūrpā" of blank verse metre.

This treatise has two aspects of importance in the history of Tamil literature. One is that this mentions for the first time, the "Prabandhas" as 96 in number. The date of the present treatise is fixed as the first quarter of the 16th Century, and therefore it takes back the concept of the 96 prabandhas in Tamil literature to a period earlier by a Century and a half. This is a remarkable contribution of Tamil literary history.

The second aspect is the personification of a poem as a damsel. The author says (Verse 33) the poet is the father of the Damsel (Poem); poverty-her mother; the audience constitute the sages; the person who reads the script-elder brother of the damsel; those who commend the poem-kith and kin; the patron who gives a prize-her husband. This is an unusual feature, which is not met with anywhere in all literature.

Renowned Tamil Scholar Thiru M. Arunachalam has critically edited the work "Prabandhamarapiyal", with an exhaustive introduction which deals with the history of the subject over the whole range of Tamil literature. Considering the importance and usefulness of the work to the students of history of Tamil Language and literature, it is published as a separate book also.

My heartfelt thanks are due to all persons who have helped and extended their co-operation in bringing out this volume and special mention should be made of Prof. R. N. Sampath (Ex-Curator of Govt. Oriental Manuscripts Library, Madras-5 and present Professor of Sanskrit, Presidency College, Madras-5) who was mainly responsible for the preparation of this volume,—Thiru A. M. Sundararajan (Librarian, Connemara Public Library. Madrs and Ex-Curator-in-charge, of Govt. Oriental Manuscripts Library, Madras-5) for his keen interest in brining out this Volume—Dr. S. K. Nayar, Professor and Head of the Department of Malayalam, University of Madras, for kindly going through the press copy of the Malayalam Matter and offering valuable suggestions—Thiru

K. M. Prabhakara Variar, Reader in Malayalam, University of Madras, for kindly furnishing the English translation of the Malayalam matter—Thiru Mohammad Yousuf Kokan, Reader in Islamic Languages, University of Madras, for kindly correcting the proofs of Persian matter—Staff of this Library for their earnest co-operation—M/s. Rathnam Press, Madras-1 for their neat printing of this volume.

C. R. VITTOBABU,
*General Editor and Curator-in-charge,*
*Govt. Oriental Manuscripts Library.*

MADRAS,
16-12-1976

॥ श्रीः ॥

# ॥ अधिकारसङ्ग्रहव्याख्या ॥

## ॥ उपोद्धातः ॥

सुविदितमिदं यच्छ्रीमदाचार्यसार्वभौमाः कवितार्किकसिंहाः सर्वतन्त्रस्वतन्त्राः श्रीरङ्गराजानुगृहीतवेदान्ताचार्यनामधेयमहिताः परमकारुणिकाः श्रीमद्वेङ्कटनाथपादाः अखिलजगद्धितानुशासनप्रवृत्तश्रुतिशिखरनिकरवेदिताभिः द्वात्रिंशता ब्रह्मविद्याभिः मुमुक्षूपास्यतया प्रतिपादितस्य जगज्जन्मादिकारणस्य आश्रितवात्सल्यैकजलधेः परस्य ब्रह्मणो भगवतः श्रीमन्नारायणस्य स्वरूपरूपगुणविभूत्यादि, चेतनाचेतनशरीरविशिष्टत्वं, मुमुक्षूपायोपेयत्वं, सकलफलप्रदत्वं, सर्वेषामस्माकं सकलेप्सितविधानार्थं नित्यं परत्वाद्यर्चावतारान्तशुभाश्रयसन्निधानं, सौशील्यवात्सल्यादिकल्याणगुणगणयोगं च पूर्वाचार्यपरम्परोपदेशप्राप्तं सर्वोपभोग्यतया प्रतिपादयितुं उभयवेदवेदान्त श्रीसूक्तिसमवलम्बनेनैव द्वात्रिंशदधिकारशोभितं श्रीमद्रहस्यत्रयसाराख्यं ग्रन्थवरं संस्कृतद्राविडोभयवेदान्तसारबोधकं अवश्यज्ञातव्यमनुगृहीतवन्त इति ।

अत्र च महाप्रबन्धे प्रत्यधिकारं आदावन्ते च संस्कृतभाषया श्लोकद्वयं, अन्ते द्रामिड्या भाषया गाथामेकां च प्रतिपाद्यार्थसङ्ग्रहरूपेण प्रसादितवन्तः । तान् संस्कृतश्लोकान् सङ्कलय्य नित्यानुसन्धानार्थं "अधिकारसङ्ग्रहा"ख्यं पृथक् प्रबन्धं निर्मितवन्त इति "पठत" इति (4) श्लोकेन सुस्पष्टं सर्वेषाम् । एवमेव ग्रन्थेऽस्मिन् दृश्यमानानां द्राविडगाथानामपि सङ्कलनं "अधिकारसङ्ग्रह" इति व्यवहारेण पृथक्प्रबन्धतया समुल्लसति ।

ग्रन्थालये चास्मिन् श्रीमद्वेङ्कटनाथैरनुगृहीतस्य संस्कृतश्लोकसङ्कलनस्य अधिकारसङ्ग्रहनाम्नोऽस्य मूलमात्रं पञ्चसु कोशेषु वर्तते । व्याख्याः पञ्च नवसु कोशेषु वर्तन्ते । तासु कौशिकश्रीनिवासाचार्यकृता चतुर्षु कोशेषु, भारद्वाजश्रीनिवासाचार्यकृता भावप्रकाशिनीनाम्नी चैकस्मिन् कोशे, अज्ञातकर्तृनाम्नी च व्याख्या द्वयोः

कोशयोः, द्राविडभाषाटीका चैकस्मिन् कोशे वर्तते । द्राविडगाथासङ्कलनस्य मूलमात्रं चतुर्षु कोशेषु वर्तते । व्याख्ये द्वे चतुर्षु कोशेषु वर्तेते । तयोरेका श्रीमद्भिः शठकोपयतीन्द्रैः वीरराघवयतीन्द्रशिष्यैरनुगृहीता संस्कृतव्याख्या चैकस्मिन् कोशे, मणिप्रवालव्याख्या चैका त्रिषु कोशेषु वर्तते ।

द्राविडगाथानां चासां संस्कृतानुवादः अधिकारसङ्ग्रहदीपिकाख्यः सव्याख्यः श्रीमद्भिः कौशिकरङ्गाचार्यवर्यैरनुगृहीतः चतुर्षु कोशेषु वर्तते । तासां द्राविडगाथानां श्रीकौशिकरङ्गाचार्यवर्यैः कृतः श्लोकरूपः अधिकारसङ्ग्रहदीपिकाख्यः संस्कृतानुवादः सव्याख्यः एतत्कोशागारस्य वार्षिकप्रकाशने एकोनविंशे संपुटे प्रथमभागे समुद्यत ।

मूलग्रन्थस्थसंस्कृतश्लोकानां श्रीमद्रहस्यत्रयसाराख्ये मूलग्रन्थ एव व्याख्याः तत्र तत्र सुविस्तरं पञ्चभिः व्याख्यातृभिः (सारदीपिकायां सारास्वादिन्यां सारविवरण्यां सारप्रकाशिकायां सारप्रकाशिकासङ्ग्रहे च) पञ्चसु ग्रन्थेषु कृताः । पञ्चापि ते ग्रन्था मुद्रिताश्च । तेषु सारदीपिकाकाराः कौशिकान्वयजाः श्रीभाष्यं श्रीनिवासाचार्या एव ग्रन्थस्यास्य अधिकारसङ्ग्रहस्य पृथक्प्रबन्धस्य व्याख्यां कृतवन्तः । सेयमद्य **अध्यक्षेण र. न. संपन्नामकेन पण्डितेन वेङ्कटाचार्येण** च R. No. 8765 तमाङ्कविशिष्टेन कोशेन साकं पर्यवेक्ष्य संशोध्य प्रकाश्यते ।

इयं व्याख्या D. No. 15640 इत्यङ्कवति कोशे वर्तमाना सारदीपिका च प्रमाणोपपादने प्रतिपादनशैल्यां च समाना वर्तत इति सङ्ग्रहविस्तररूपेण एकेनैव पृथक् संस्कृतद्राविडरूपेण कृतेति ज्ञायते । एवमेवानेन आचार्यवर्येण व्याख्यानान्तरमपि संस्कृतभाषया कृतमिति भाति । यतोऽत्र "व्याख्यान्तरे" इत्यारभ्य दृश्यमानो भागः अत्रत्यकोशान्तरयोः D. No. 5345, D. No. 5346 इत्यङ्कवतोः कोशयोः तथैव समस्ति । यद्यन्यदीयमुदाह्रियेत "तथोक्तं" "अन्यत्र" "यथोक्तं" "तेनैवं" इति स्यात् । "ममैव" "मया" इति मुक्तकण्ठमनुक्तावपि व्याख्यान्तरपदग्रहणस्वारस्यात् सूचनमस्तीति सुगमम् । अधिकारसङ्ग्रहस्यैवेयं विस्तरतो-

व्याख्या, सङ्क्षेपतो व्याख्यान्तरं कृतमिति च सुवचम्। तच्च व्याख्यान्तरञ्चैतत्सङ्ग्रहरूपमेव। उभयभाषया मूले श्रीरहस्यत्रयसाराख्येऽतिविपुलं श्लोका इमे व्याख्याता इत्युक्तं पूर्वमेव। शैल्या सारदीपिकाकारस्येयं व्याख्या, व्याख्यानवाक्यजालज्ञापितं व्याख्यानान्तरं चास्ति तस्येति सुनिरूपम्।

अधिकारसङ्ग्रहस्यास्य पृथक् सङ्कलितस्य प्रबन्धस्य पञ्च व्याख्याः संसन्ति। एका प्रकृते प्रकाश्यमाना श्रीमद्रहस्यत्रयसारस्य मूलग्रन्थस्य सारदीपिकाख्यमणिप्रवालव्याख्याकारिभिः श्रीभाष्यश्रीनिवासाचार्यैः कौशिकैः सङ्कलिता। व्याख्यानान्तरमप्येभिः कृतमिति प्रागेवोक्तम्। अपरा भावप्रकाशिनीनाम्नी मूलग्रन्थस्य सारप्रकाशिकाख्यसंस्कृतव्याख्याकारिभिः श्रीभाष्यश्रीनिवासाचार्यैः भारद्वाजैः सङ्कलिता समस्ति R. No. 3235 इत्यङ्कवति कोशेऽत्र कोशागारे। इतरा च लघुव्याख्या काचिदस्य श्रीमद्भिः जगन्नाथाचार्यैः विरचिता R. No. 13611 इत्यङ्कवति कोशे प्रधानप्रतितन्त्राधिकारपर्यन्तमेव लभ्यमाना चकास्ति। अन्या अज्ञातकर्तृनाम्नी समग्रा R. No. 11287 R. No. 13592 इत्यङ्कवतोः कोशयोः प्रकाशते। परा द्राविडभाषाटीका परिपूर्णा R. No. 521 (a) (Tamil) इत्यङ्कवति कोशे वरीवर्ति।

उभाविमौ श्रीनिवासाचार्यौ समकालिकौ वाधूलश्रीनिवासाचार्यात् पेरियप्पदेशिकाख्यात् अधिगतसमस्तवेदान्तद्वयार्थसंशोभिताविति ज्ञायते। तथाहि-सारदीपिकायां कौशिकश्रीनिवासाचार्याः "अर्था रहस्यत्रयसारसंभृताः स्फुरन्ति चित्ते मम यत्प्रसादतः। तं नौमि वाधूलकुलीनदेवराडार्यसूनुं पेरियप्पदेशिकम्" ॥ इति, भावप्रकाशिन्यां भारद्वाजश्रीनिवासाचार्याश्च "वन्दे श्रीदेवराजार्यसूनुं वरगुणाकरम्। श्रीनिवासगुरुं श्रीमद्वाधूलकुलभूषणम् ॥" इति च स्वाचार्यमस्तुवन् ॥

सारप्रकाशिकाकाराः भारद्वाजश्रीनिवासाचार्याः भावप्रकाशिनीं अधिकारसङ्ग्रहव्याख्यां कृतवन्तः इति, तत्पिता श्रीनिवासाचार्य इति च सुष्ठु ज्ञायते। यतो हि—"तत्रत्यतत्तदधिकाराद्यन्तयोः तत्तदधिकारार्थानेकैकश्लोकेन सङ्गृह्य प्रदर्श्य तानेव श्लोकानधिकारसङ्ग्रहाख्यप्रबन्धत्वेन च चकार। तथैव ते श्लोकाः सारप्रकाशिकायां व्याख्याता अपि भावप्रकाशिन्याख्यप्रबन्धेन विशिष्य व्याख्यास्यन्ते ॥"

इति, सारप्रकाशिकायां—“भारद्वाजकुलाब्धीन्दुश्रीनिवासार्यसेवया । रहस्यत्रय-सारार्थस्तत्सुतेन प्रकाश्यते ॥” इति च दरीदृश्यते ।

सारदीपिकाकाराः कौशिकश्रीभाष्यश्रीनिवासाचार्या एवेमां व्याख्यां कृतवन्त इतीदं अत्रैव ग्रन्थादौ—“श्रुतिमौलिदेशिकगुरुर्मुदा सतामधिकारसङ्ग्रहममुं व्यरीरचत् । तमहं पुनर्नकठिनं यथाश्रुतं विवृणोमि तस्य करुणावलम्बनः ॥” इति श्लोकेन सुबोधं सर्वेषाम् ।

इमौ द्वावपि श्रीनिवासाचार्यौ कौशिकभारद्वाजौ श्रीभाष्यसमाख्याविशेष-समलङ्कृतौ । यतः (D. No. 15640) प्रकृते अधिकारसङ्ग्रहव्याख्याग्रन्थे अन्ते “श्रीभाष्यश्रीनिवासेन कौशिकान्वयजन्मना । सङ्ग्रहस्याधिकाराणां व्याख्येयं साधु निर्मिता ॥” इति, (R. No. 3235) भावप्रकाशिन्यां आदौ “भारद्वाजकुलाब्धीन्दुं भाष्याख्यामृतपूरितम् । द्रमिडोपनिषद्रूपं श्रीनिवासगुरुं भजे ॥” इति च परिदृश्यते ॥

सारदीपिकाकाराः कौशिकश्रीभाष्यश्रीनिवासाचार्याः सारप्रकाशिकाकाराः भारद्वाजश्रीभाष्यश्रीनिवासाचार्याश्च आचार्यसार्वभौमैः श्रीमद्वेदान्ताचार्यैरनुगृहीतस्य व्याख्येयस्य अधिकारसङ्ग्रहस्य दिव्यस्य प्रबन्धस्य कालक्षेपोपकरणत्वेन मुमुक्षुजन-नित्यानुसन्धीयमानतां प्रसन्नगम्भीरशैल्या सर्वोज्जीवनहेतुतत्त्वहितपुरुषार्थबोधनवैखरीं श्रीमद्रहस्यत्रयार्थविशिष्टव्याख्यानतया भोग्यतां च मनसि सदानुसन्धाय परमानन्द-भरिताः सर्वेषां सुग्रहत्वाय मूलस्य रहस्यत्रयसारस्य, पृथङ्निर्मितस्याधिकारसङ्ग्रहस्य च विशिष्य व्याख्यानं कृतवन्तः प्रसादातिशयेनेति ग्रन्थस्यास्य प्रकाशनेन भगवतः श्रियःपतेः मुखोल्लासकरं परमं कैङ्कर्यं कृतमस्माभिरिति निश्चिनुमः ॥

**Correction in Sanskrit Introduction**

**Page 1. Line 22.** **Read this:**

जगन्नाथकृता लघुव्याख्या चैकस्मिन् कोशे, अज्ञातकर्तृनाम्नी व्याख्या चैकस्मिन् कोशे, द्राविडभाषाटीका द्वयोः कोशयोः, एवमेव रहस्यत्रयसारस्य श्लोकानां गाथानां च सङ्कलय्य व्याख्यानमतिरिक्तं भिन्नं च श्रीनिवासाचार्यकृतमेकस्मिन् कोशे वर्तते । [for अज्ञात to वर्तते ।]

इत्थं

**ति. अ. कु. वेंकटाचार्यः**

संस्कृतपण्डितः

॥ श्रीः ॥

॥ श्रीहयग्रीवाय नमः ॥

# ॥ अधिकारसङ्ग्रहव्याख्या ॥

## ॥ श्रीभाष्यश्रीनिवासार्यकृता ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि[1] ॥ 1 ॥

वेदान्ताचार्यवर्येण वेङ्कटेश्वरसूरिणा ।
समुद्धृतोऽधिकाराणां सङ्ग्रहोऽद्य विविच्यते ॥ 2 ॥

श्रुतिमौलिदेशिकगुरुर्मुदा सता-
मधिकारसङ्ग्रहममुं[2] व्यरीरचत् ।
तमहं [3]पुनर्नकठिनं यथाश्रुतं
विवृणोमि तस्य करुणावलम्बनः ॥ 3 ॥

इह खलु कवितार्किकसिंहस्सर्वतन्त्रस्वतन्त्रो वेदान्ताचार्य इति श्रीरङ्गराजदत्तापरनामधेयः श्रीमान् वेङ्कटनाथार्यः मुमुक्षूज्जीवनाय तदपेक्षितसकलार्थपरिपूर्णरहस्यत्रयसाराख्यं दिव्यं प्रबन्धं प्रणीय तत्रोक्तद्वात्रिंशदधिकाराणामादावन्ते च तत्तदधिकारोक्तसङ्ग्राहकं संस्कृतरूपं पद्यद्वयं निरमिमीत ।

भूयस्तान्यपि पद्यानि समुद्धृत्य रहस्यत्रयपठनालसानामुपकारायाधिकारसङ्ग्रहं नाम प्रबन्धं पृथक्त्वेन चकार । स चेह मुमुक्षुभिस्सर्वैः कालक्षेपोपकरणत्वेन

---

1. The verse is not found.
2. सङ्ग्रहमयं
3. तमिह प्रसन्नकठिनं

भोग्यतया नित्यमनुसन्धेयः । तस्य च प्रसन्नगंभीरतयाऽ[1]त्र सत्सम्प्रदायं विनार्थो दुरवबोधो भवति । तदवबोधनायाधिकारसङ्ग्रहव्याख्यां नातिसङ्कोचविस्तारां वेदान्ताचार्यकृपावलम्बनोऽहं यथाश्रुतं विलिखामि । तामिमां सम्प्रदायज्ञाः कृतिनो विशोध्य परिपालयन्तु ।

रहस्यत्रयसारश्च द्वात्रिंशदधिकारपरिष्कृतः । रहस्यत्रयसारस्यादौ तदुपसर्जनतया गुरुपरम्परासारो नाम प्रबन्धो न्यबन्धि । तेनैव गुरुपरम्परासारस्य पृथक्प्रबन्धत्वेऽपि तदुपसर्जनतया सैवं रहस्यत्रयसारस्यादौ अनुसन्धीयते । अत एव अधिकारसङ्ग्रहेऽप्यादौ गुरुपरम्परासारश्लोका [2]उपात्ताः ।

## ॥ मङ्गलाचरणम् ॥

अधिकारसङ्ग्रहाख्य[3]प्रबन्धं चिकीर्षुर्वेदान्ताचार्यः आदावाचार्येभ्यः स्वाभीष्टं प्रार्थयते[4]—

**प्रपदनमये विद्याभेदे प्रतिष्ठितचेतसः**
**प्रति[5] (दिश)[पद]मिह प्रज्ञादायं दिशन्तु दयाधनाः ।**
**शठरिपुशुकव्यासप्राचेतसादिनिबन्धन-**
**श्रमपरिणतश्रद्धाशुद्धाशया मम देशिकाः ॥ १ ॥**

स्वस्मिन् प्रार्थनादपि स्वभक्तेभ्यः स्वाभीष्टप्रार्थनं भगवतोऽभिमततमम् । एतच्च "यद्वाप्तवर्गात्" (श्लो. 19 d) इति न्यासविंशतौ वेदान्ताचार्यैरेव स्फुटी-

---

1. कुत्रचित् सम्प्र-
2. उपपत्तौ ।
3. -हाख्यं प्र-
4. प्रार्थयति-प्रपदनमय इति ।
5. The Commentary has पद

कृतम् । प्रपदनमये प्रपदनरूपे विद्याभेदे उपासनाद्भिन्ने प्रतिष्ठितचेतसः प्रपन्नाग्रेसराः देशिकाः नाथयामुनयतिवरप्रभृतयः पुनः कीदृशाः शठरिपुः द्रामिडब्रह्मसंहितादर्शी शठकोप इति प्रसिद्धः, प्राचेतसो वाल्मीकिः, आदिशब्देन पराशरादयस्सङ्गृहीताः, तेषां [1]निबन्धनानि द्रामिडब्रह्मसंहिता भागवत महाभारतश्रीमद्रामायण[2]विष्णुपुराणादीनि, तत्र श्रमः भूयः परिचयः तेन [3]परिणता या श्रद्धा भगवद्भागवतविषयनिरतिशयभक्तिः, तया शुद्धभावाः मम प्रस्तुतप्रबन्धचिकीर्षोः इह वक्ष्यमाणप्रबन्धे जगति वा प्रतिपदं [4]प्रतिशब्दं प्रतिपदन्यासं वा प्रज्ञा उचितज्ञानं सैव दायः अंशतस्स्वार्हो[5] भागः तं दिशन्तु [6]ददन्तु ॥ १ ॥

## ॥ गुरुपरम्परासारः ॥

अनन्तरं गुरुपरम्पराश्लोकयोराद्ये उक्ताः पूर्वाचार्याः मम निरतिशयप्रीतिविषया भवन्तु इत्या[7]शंस(न्ते)[ते]—

एते मह्यमपोढमन्मथशरोन्माथाय नाथादय-
स्त्रय्यन्तप्रतिनन्दनीयविविधोदन्तास्स्वदन्तामिह ।
श्रद्धातव्यशरण्यदम्पतिदयादिव्यापगाव्यापकाः
स्पर्धाविप्लवविप्रलम्भपदवीवैदेशिका देशिकाः ॥ २ ॥

एते पूर्वोक्ता देशिकाः, कीदृशाः, इह जगति त्रय्यन्ते वेदान्तव्याख्याने

---

1. प्रबन्धानि
2. श्रीविष्णु-
3. सम्भृता
4. पदे पदे प्रतिशब्दं
5. -स्स्वार्हभागः
6. ददन्त्विति ।
7. -शंसते-एत इति ।

यद्वा [1]त्रय्यन्तव्याख्यानेन हेतुना प्रतिनन्दनीयाः विविधाः [2]उदन्ता वृत्तान्ता येषां ते। किञ्च श्रद्धातव्या उज्जीवनाय विश्वसनीया दयाया विशेषणं दम्पत्योर्वा, शरण्यौ यौ दम्पती लक्ष्मीनारायणौ, तयोर्या[3] दया सैव दिव्यापगा दिव्य[4]गङ्गा तां व्याप्नुवन्तीति ते। दयायाः परिणतयः तासां सर्वासां विषयभूता इत्यर्थः। यद्वा व्यापका इति णिजन्तात् [5]ण्वुल्। स्पर्धा अन्योन्यविरोधः, विप्लवस्सदाचारभ्रंशः, विप्रलम्भो वञ्चनं[6], तेषां पदवी सञ्चरणमार्गः तस्या वैदेशिका देशान्तरस्थाः [7]तैर्दूरोज्झिता इत्यर्थः। [8]अपोढः अपगतः मन्मथशराणा[9]मुन्माथः पीडा यस्मात् [10]तस्मै मह्यं स्वदन्तां रोचन्तां [रु]चिविषयभूता भवन्तु ॥ २ ॥

**अथ गुरुपरम्परोत्कर्षमनुसन्धत्ते[11]--**

**हृद्या हृत्पद्मसिंहासन(ग?)[रसिक][12]हयग्रीवहेषोर्मिघोष-**
**क्षिप्तप्रत्यर्थिदृप्तिर्जयति बहुगुणा पङ्क्तिरस्मद्गुरूणाम्।**
**दिक्सौधाबद्धजैत्रध्वजपटपवन[13]स्यूतिनिर्धूततत्त-**
**त्सिद्धान्तस्तोमतूलस्तबकविगमनव्यक्तसद्वर्ति[14]नीका ॥ ३ ॥**

---

1. त्रय्यन्तप्रतिनन्दनीयविविधोदन्ताः त्रय्यन्त-
2. उदन्ता omission
3. या omission
4. -व्या गङ्गा
5. ण्वुल्। किञ्च स्पर्धेत्यादि।
6. -नं इमानि आत्मगुणानां उपलक्षणानि।
7. मतैर्दूरो-
8. नाथादयः पूर्वोक्ताः। अपोढेत्यादि। अपोढः
9. उन्मथनं पीडा
10. उत्थितमन्मथाय यद्वा मदमपि प्रार्थ्यते, स्वप्रसादात् उत्थितमन्मथपीडाय मह्यं स्वदन्तां
11. -त्ते-हृद्येति।
12. रसिक in Rahasyatrayasāra
13. स्फाति in R. S.
14. वर्तनीका in R. S.

हृद्या हृदयङ्गमा, [1]हृत्पद्ममेव सिंहासनं तत्र रसिकः[2][कृत]प्रतिष्ठो यो हयग्रीवस्तस्य हेषाशब्दानामूर्मयः परम्परास्तेषां कोलाहलेन प्रतिक्षिप्तः[3] प्रत्यर्थिनां दृप्ति[4]गर्वो (येषां)ते[यया सा]। किञ्च दिशो[5] दिगन्तास्ता एव सौधास्तत्राबद्धाः ये जैत्राः जयशीलाः ध्वजास्तत्पटैरुत्थापितो यः पवनस्तस्य [6]स्यूतिस्समृद्धिः तया निर्धूता निरस्तास्ते ते सिद्धान्ता[7]स्तेषां स्तोमा एव तूलस्तबकाः कार्पासपिण्डास्तेषां विगमनेन अपगमनेन व्यक्तास्सद्वर्तिन्यस्सतां मार्गा यया सा। पूर्वं बाह्यकुदृष्टि-सिद्धान्त[8]तूलस्तबकैराक्रान्तसन्मा[9]र्गा जातास्ते तूलस्तबका यस्याः ध्वजपटपवनवेगेन निर्धूताः। बहुगुणा एवमनेकगुणविशिष्टा असद्गुरूणां नाथयामुनादीनां पङ्क्तिः [10]जयति सर्वोत्कर्षेण वर्तते। सा मम प्रसन्नास्तु इति शेषः ॥ ३ ॥

[11]रहस्यत्रयसारादुद्धृत्य अधिकारसङ्ग्रहः कृतः, तमिमं मुमुक्षवस्सादरं पठतेत्यनुजानाति[12]—

**पठत रहस्यत्रयसारादुद्धृतमधिकारसङ्ग्रहं सुधियः।**
**जननपदवीगतागतजङ्घालत्वं [13]जिघांसन्तः ॥ ४ ॥**

---

1. हृत्पद्मेत्यादि। हृत्पद्म-
2. -को स्थिरप्रति-
3. -क्षिप्ताः
4. दृप्यो गर्वाः
5. दिक्सौधेत्यादि। दिशो
6. स्फातिः
7. -न्ताः बाह्यकुदृष्टिविषयाः
8. -तरुलतास्तब-
9. -न्मार्गजाताः
10. जगति
11. अथ रहस्य-
12. -ति-पठतेति।
13. "जिहासन्त" इति भावप्रकाशिनी

सुधियः ! सारासारविवेकज्ञाः जननपदव्यां संसारमार्गे गतागतेषु याता-यातेषु जङ्घालत्वं जिघांसन्तः हन्तुमिच्छन्तो यदि [1]रहस्यत्रयसाराख्यग्रन्थात्सारत्वेन पृथक्कृतं अधिकारास्सङ्गृह्यन्तेऽस्मिन्नित्यधिकारसङ्ग्रहः(सा)[तं]पठत जपत । पठते-त्यनेन जपोच्चारणमेवालम्, नार्थज्ञाननिर्बन्ध इति व्यज्यते ॥ ४ ॥

## ॥ उपोद्घाताधिकारः प्रथमः ॥

उपोद्घाताधिकारस्य प्रथमस्याद्यन्तश्लोकयोः आद्येन जीवः स्वभावतः कौस्तु-भवन्नित्यहृद्योऽप्यनाद्यपराधवशात्कलुषितचि[2]त्तस्सन् भगवदनुभवमलभमानस्संसारे चिरं तिष्ठन् कदाचिद्भाग्यवशाद्भगवद्वीक्षणमूललब्धात्मसत्ताकः क्रमेणात्मानं गोपा-यतीत्या[3](हुः)[ह]—मणिवर इति ।

मणिवर इव शौरेर्नित्यहृद्योऽपि जीवः
कलुषमतिरविन्दन् किङ्करत्वाधिराज्यम् ।
विधिपरिणतिभेदाद्वीक्षितस्तेन काले
गुरुपरिषदुपज्ञं प्राप्य गोपायति स्वम् ॥ ५ ॥

जीवश्चेतनः मणिवर इव श्रीकौस्तुभ इव शौरेर्भगवतः नित्यं[4] हृद्योऽपि हृदयङ्गमोऽपि हृदये स्थातुं योग्योऽपि कलुषमतिः अनाद्य[5]पराधवशात्सञ्जाताज्ञानः तद्द्वारा संसरन् अत एव कैङ्कर्यसाम्राज्यमलभमानश्चिरं तिष्ठन् कदाचिद्विधिपरिणति-

---

1. रहस्यत्रयसारात् उद्धृतं अधिकारसङ्ग्रहं पठत
किमिच्छन्तः जननेत्यादि । जननपदवी संसार-
मार्गः गतागतेषु गमनागमनेषु जङ्घालत्वं संसार-
मार्गपान्थत्वं जिहासन्तः त्यक्तुमिच्छवो मुमुक्षव इत्यर्थः ॥ ४ ॥
2. सन् omission
3. त्याह-मणिवर इति ।
4. नित्यहृद्यः नित्यहृदयङ्गमः
5. -दिपापवशा-

भेदात् विधीयत इति विधिः कर्म पुण्यपापरूपं तत्परिणतिभेदः[1] यादृच्छिकसुकृतं[2] यद्वा विधिशब्देनात्र भगवद्दया उपलक्ष्यते, विदधाति सर्वमिति कर्तरि व्युत्पत्त्या दयोच्यते। तस्याः परिणतिभेदः[3] अज्ञातसुकृतादि[4] तस्मात् स्वदयापादितसुकृत-वशादित्यर्थः। तेन भगवता काले कटा(क्ष)[क्षि]तः[5] गुरुपरिषदुपज्ञं स्वं प्राप्य सात्त्विक-सम्भाषणादिक्रमेण सदाचार्यं समाश्रित्य गुरुपरिषद्भ्यः[6] आदौ [7]ज्ञातं सद्भावं [8]प्राप्य आचार्योपदेशात्प्राक् स्वरूपतस्सन्नपि ब्रह्मज्ञानाभावादसन्निति श्रुतिरेव दर्शयति, "असन्नेव स भवती"त्यादि। [9]गोपायति भक्तिप्रपत्त्युपायपरिग्रहादि(ति)[भिः] स्वात्मानं रक्षति स्वहितमाचरति। स्वहिताचरणमेव रक्षणमस्य।

[10]व्याख्यान्तरे—अथ नित्यसूरितुल्यचेतनस्य एतादृशपुरुषार्थानुपलब्धौ हेतुं दर्शयन् उत्तरत्र तत्पुरुषार्थलब्धये गुरुपरम्परा(प्रोक्त)[प्राप्तं] मन्त्राख्यद्रव्यमेव साधनमिति वक्तुमाह-जीवश्चेतनश्शौरेः पुरुषोत्तमस्य मणिवर इव कौस्तुभ इव नित्य-हृद्योऽपि नित्यमनोहरोऽपि, अनेन जीवस्य संसारानर्हत्वं कौस्तुभाभिमानिदेवतात्वं च सूचितम्। कलुषमतिः अनादिकर्मवासनया सङ्कुचितज्ञानः किङ्करत्वं कैङ्कर्यं तदेवाधिराज्यं सार्वभौमत्वं अविन्दन् अलभमानः विधिपरिणतिभेदाद्भाग्यपरिपाक-विशेषात्तेन भगवता काले जननकाले वीक्षितः गुरुपरिषद्भ्यः उपज्ञातं स्वेन गृहीतं स्वं मन्त्राख्यद्रव्यं प्राप्य गोपायति। "मन्त्रं यत्नेन गोपयेत्" इति स्मरणात्॥ ५॥

---

1. -भेदाः
2. -कृतानि
3. -भेदात्
4. -कृतादीनि तैः हेतुभिः
5. -तस्सन्
6. -षद्भिः
7. ज्ञात्वा उपदिष्टमित्यर्थः। "उपज्ञोपक्रमं तदाद्याचिख्यासाया"मिति नपुंसक-लिङ्गत्वं, स्वस्वरूपं आचार्यप्रथमकटाक्षलब्धसत्ताकमित्यर्थः।
8. लब्ध्वा
9. स्वं गोपा-
10. व्याख्यान्तरे……स्मरणात्। This portion is not found in R. no. 8765, but found in D. no. 5345 and D. no. 5346

अथ उपोद्घाताधिकारद्वितीयपद्येन[1] पूर्वोक्तविधिपरिपाकस्य सर्वसिद्धान्तसिद्धत्वप्रदर्शनं प्रपन्नस्य प्रबलगुणानुभवकैङ्कर्यादिरूपवृत्तेर्मुक्तिवत् भोग्यतां प्रतिपाद्य तादृशाधिकारिणो दुर्लभतामाह—

**कर्माविद्यादिचक्रे प्रतिपुरुषमिहानादिचित्रप्रवाहे**
**तत्तत्काले विपक्तिर्भवति हि विविधा सर्वसिद्धान्तसिद्धा ।**
**तल्लब्धस्वावकाशप्रथमगुरुकृपागृह्यमाणः कदाचि-**
**न्मुक्तैश्वर्यान्तसम्पन्निधिरपि भविता कश्चिदित्थं विपश्चित् ॥ ६ ॥**

इह जगति [2]प्रतिपुरुषं कर्माविद्यादिचक्रे अनाद्यविद्यया कर्म, कर्मणा देवादिशरीरपरिग्रहः, शरीरपरिग्रहादविद्या, एतेषां चक्रे समूहे अनादि[र]ज्ञातादिश्चित्रो नानाप्रकारः प्रवाहो यस्य तस्मिन् तथोक्ते सति तत्तत्काले अनुभवोन्मुखकाले विविधा कर्मभेदान्नानाविधा सर्वसिद्धान्तेषु सिद्धा सम्प्रतिपन्ना विपक्तिः परिपाकः भवति हि भवत्येव । तस्मिन् परिपाकावसरे लब्धः प्राप्तः स्वावकाशो यया सा च प्रथमगुरुकृपा च तया गृह्यमाणः । कश्चित् विपश्चिदितिशब्देन सहस्रेषु कश्चिदिति दौर्लभ्यं सूच्यते । कदाचित् कस्मिंश्चित् काले, इत्थमनेन प्रकारेण विपश्चित् सन् आचार्योपसत्त्या गृहीतभक्तिप्रपत्तिज्ञानतया सर्वज्ञस्सन्

---

1. -न विधिपरिणतिभेदादित्युक्तमेव उपपादयति-कर्मेति ।

2. प्रतिपुरुषं पुरुषाणां अनादिचित्रप्रवाहे अनादिरज्ञातादिः चित्रो नानाप्रकारः परिग्रहः, शरीरपरिग्रहादविद्या एतेषां चक्रं मण्डलं, अस्मिन् विचित्रप्रवाहे अस्मिन् चक्रे निरन्तरं भ्रमति पुण्यपाप ······ तत्तत्काले अच्छपापदशायाः इयं कस्यचित् कदाचिन्मोक्षानुगुणः परिपाको भवतीति । इयं प्रक्रिया सर्वसिद्धान्त······दं अङ्गीकृता । एवमनङ्गीकारे तत्तन्मते मोक्षस्य अनवकाशप्रसङ्गात् मोक्षकथा निरर्थका स्यात् तल्लब्ध्यत्यादि ? । तत्र अ······वकाशया प्राप्तावसरया प्रथमगुरोः परमाचार्यस्य भगवतः कृपया परिगृह्यमाणः कश्चित् कश्चिदितिशब्देन सहस्रेषु कश्चिदिति ······ सूच्यते । कदाचित् कस्मिंश्चित् कालविपर्यये इत्थं अनेन प्रकारेण विपश्चित् सन् आचार्योपसत्या गृहीतभक्तिः प्रपत्तिरूपज्ञानतया······ज्ञस्सन् मुक्तैश्वर्यं भगवत्परिपूर्णानुभवपूर्वकैङ्कर्यकरणं तदेव सम्पत् साम्राज्यं तन्निधिः संपन्नो निरवधिकैश्वर्यवानपि भविष्य··· ॥

मुक्तैश्वर्यमन्ते यस्यास्सा च सम्पच्च गुणानुभवकैङ्कर्यरूपा वृत्तिः तस्या निधिर्निक्षेप-स्थानमपि भविता । प्रथमं सुकृतपरिपाकः, पश्चात्प्रपत्तावन्वयः, अनन्तरं गुणानुभवरूपा वृत्तिः, ततो मुक्तैश्वर्यमिति क्रमो द्रष्टव्यः ॥ ६ ॥

## ॥ सारनिष्कर्षाधिकारो द्वितीयः ॥

अथ सारनिष्कर्षाधिकारपद्ययोराद्येन रहस्यत्रयरूपसार एव [1]आर्यापेक्षणीय इत्याह—

श्रुतिपथविपरीतं क्ष्वेलकल्पं श्रुतौ च
प्रकृतिपुरुषभोगप्रापकांशो न पथ्यः ।
तदिह विबुधगुप्तं मृत्युजी[2] वा [ मृत्युभीता ]विचिन्व-
न्त्युपनिषदमृताब्धेरु[3]द्धृतं सारमार्याः ॥ ७ ॥

[4]श्रुतिपथविपरीतं वेदान्तमार्गविरुद्धं बाह्यकुदृष्टिशास्त्रं क्ष्वेलकल्पं विषतुल्यं सद्योमृत्युप्रदत्वादिति भावः । श्रुतौ च प्रकृतिपुरुषभोगप्रापकांशः प्रकृत्यनुभवः ऐश्वर्यं, पुरुषानुभवः केवलस्वात्मानुभवः, तयोः प्रापकौ केवलकर्मयोगज्ञानयोगौ, तत्प्रतिपादकांशः ऐश्वर्यकैवल्यतत्साधनप्रतिपादकांशः, [5]पथ्यः [न] हितकरो न भवति । तत् तस्मात् इह जगति मृत्युजीवा[6] आर्यास्सन्तः [7]विबुधैर्ज्ञानिभिर्गुप्तं

---

1. अवश्यापेक्षणीय इत्याह—श्रुतीति ।
2. -भीता. in R. S.
3. -त्तमं in R. S
4. मृत्युः संसारः मृत्युभीता मुमुक्षा······तेषां श्रुतिपथविपरीतं वाङ्मयं बाह्यकु-दृष्टिशास्त्रं तच्च वेदान्तमार्गविरुद्धमेवार्थं वदति । क्ष्वेल-
5. न पथ्यः
6. -भीताः
7. मृत्यु[भी]ता एवाचार्या इत्यपि सूच्यते । देवरहस्यं विबुधगुप्तं, एतद्वै महोप-निषदं देवानां गुह्यमित्युक्तेः । उपनिषदमृताब्धे ······ सारांशेष्वपि सारं तादृशस्सारो रहस्यत्रय(वे)[मेव]तमेव विचिन्वन्ति अपेक्षन्ते नेतरत् ।

सुरक्षितं उपनिषदमृताब्धेरुध्दृतं सारं रहस्यत्रयरूपं विचिन्वन्ति अपेक्षन्ते नेतरत् । "उपनिषदमृताब्धेरुत्तमं सारमार्या" इति पाठे उत्तमं सारांशेष्वपि सारं तादृशस्सारो रहस्यत्रयमेव । "असारमल्पसारं च सारं सारतरं त्यजेत् । भजेत्सारतमं [1]शास्त्रे रत्नाकर इवामृतम्" ॥ इत्युक्तेः ॥ ७ ॥

अथ सारनिष्कर्षाधिकारपूर्वश्लोकोक्तरहस्यत्रयसारस्य विनियोगप्रकारं [2]दर्शयति—

**शाखानामुपरी[3]क्षितेन मनुना मूलेन लब्धात्मकः**
**सत्ताहेतुसकृज्जपेन सकलं कालं द्वयेन क्षिपन् ।**
**वेदोत्तंसविहारसारथिदयागुम्भेन विस्रंम्भित-**
**स्सारज्ञो यदि कश्चिदस्ति भुवने नाथस्स यूथस्य नः ॥ ८ ॥**

शाखाना[4]मुपरीक्षितेन शाखानामुपरिशब्देन उपनिषदुच्यते । अथर्वणोपनिष[5]दीक्षितेन ' ओमित्यग्रे व्याहरेत् " इत्यादि तत्र ह्युच्यते । मूलेन मनुना मूलमन्त्रेण आचार्योपदिष्टेन लब्धात्मकः लब्धात्मसत्ताकः । सत्ताहेतुसकृज्जपेन सत्ता कृतकृत्यता, अन्यथा अनन्वयात्, तद्धेतुस्सकृ[6]ज्जपः यस्य तेन द्वयेन सकलं कालं क्षिपन् सर्वदा कालक्षेपं कुर्वन् [7]वेदोत्तंसेषु वेदान्तेषु विहारो यस्य स चासौ सारथिः श्रीकृष्णः तद्दयायाः गुम्भेन च मनुश्लोकेन विस्रम्भितः सञ्जातविश्वासः अयमेव साराभिज्ञ इत्युच्यते । एवंभूतः कश्चिदस्मिन् भुवने अस्ति चेत्,

---

1. शास्त्रैः भोग्यतया रत्नाकर इवामृतमित्युक्तेः ॥ ७ ॥
2. -ति-शाखानामिति ।
3. -रि स्थितेन in R. S.
4. -मुपरि स्थितेन
5. षदि स्थितेन
6. -ज्जपः उच्चारणं यस्य
7. वेदोत्तंसे ········ दान्तेषु विहर्तुं शीलो यः सः वेदान्तप्रतिपाद्यः सारथिः कृष्णः गोष्ठ्याः नाथः शेषी । यद्वा सयूथः सपरिजनः तस्य······रं श्लोकेन अनुसंहितेन विस्रम्भितः विश्वासं प्राप्तः । अयमेव

कश्चिदिति [1]दौर्लभ्यं सूच्यते । स सारङ्ग: न: यूथस्य असद्गोष्ठ्या: नाथश्शेषी । यद्वा सयूथस्सपरिजन: स सारङ्गो नश्शेषी ॥ ८ ॥

## ॥ प्रधानप्रतितन्त्राधिकार: तृतीय: ॥

अथ प्रधानप्रतितन्त्राधिकारपद्ययोराद्येन मूलमन्त्रार्थतत्त्वज्ञ एव सर्वोपनिषत्तात्पर्यं वेदेत्याह—आधेयत्वप्रभृतीति ।

**आधेयत्वप्रभृतिनियमैरादिकर्तुश्शरीरं**
**सत्ताक्षे[2]मप्रयतनफलेष्वेतदायत्तमेतत् ।**
**विश्वं पश्यन्निति भगवति व्यापकादर्शदृष्टि[3]-**
**गम्भीराणामकृतकगिरां गाहते चित्तवृत्तिम् ॥ ९ ॥**

व्यापक: मूलमन्त्र: तस्य व्यापकवस्तुप्रतिपादकत्वात् । अध्याहारं विना अर्थप्रतिपादकत्वाच्च व्यापकत्वं, स एवादर्श: दर्पणं तस्मिन् दृष्टिर्यस्य स तादृश: पुरुष: विश्वं चेतनाचेतनात्मकं जगत् आधेयत्वं प्रभृतिर्येषां ते नियमा: धर्मा:, प्रभृतिशब्देन शेषत्वनियाम्यत्वादयो गृह्यन्ते । यद्धार्यं यच्छेषभूतं यन्नियाम्यं यत् तत्तस्य शरीरमिति लक्षणात्, एतैर्नियमैरादिकर्तुर्भगवत: शरीरमिति । एतत् जगत् सत्ताक्षेमप्रयतनफलेषु विषये एतस्य भगवत आयत्तं [अ]धीनमिति च पश्यन् जानन् गम्भीराणां मनोज्ञानां अकृतकगिरां अपौरुषेयवाचां वेदान्तानां चित्तवृत्तिं तात्पर्यं गाहते अनायासेन जानाति ।

व्याख्यान्तरे—आधेयत्वप्रभृतय: आधेयत्वविधेयत्वशेषत्वाख्या: विश्वगता: धर्मा: मूलमन्त्रेण पदत्रयेण व्युत्क्रमेणोक्ता: तेषां नियमै: यावद्द्रव्यभाविभि-

---

1. दुर्लभत्वं
2. -स्थेम- in R. S.
3. दृष्टे in R. S.

राधेयत्वादिभिरित्यर्थः । एतद्विश्वं चेतनाचेतनात्मकं आदिकर्तुः जगत्कारणभूतस्य च भगवतश्शरीरं भवति । किञ्च एतद्विश्वं सत्तायां स्वरूपव्याप्तौ स्थेमनि स्वरूपा[1]नुवृत्तिरूपलक्षणे प्रयतनेषु [2]दृष्टादृष्टदृष्टादृष्टार्थसर्वव्यापारेषु फलेषु [3]तत्फलव्याप्तौ ऐश्वर्यकैवल्या[4]दिव्याप्तौ च एतदायत्तं एतच्छब्दोक्तादिकर्त्रधीनमेव च[5] भवति[6] । तद्व्यतिरेकेणै[7]तेषां सत्तादिनिर्वाहको नास्तीति भावः[8] । इति पश्यन् इति वेदान्ततात्पर्यभूतम[9]र्थद्वन्द्वं जानन् पुमान् [10]व्यापकः अष्टाक्षरस्स एवादर्शः दर्पणं तत्र दृष्टे भगवति गम्भीराणामसर्वज्ञैर्दुरवगाहानामकृतकगिरां वेदान्तवाक्यानां [11]चित्तवृत्तिं तात्पर्यं जानाति । [12]वेदान्तवाक्यानि त्रिविधानि । कानिचित् विश्वेश्वरयोः भेदप्रतिपादकानि, कानिचित् तयोरभेदप्रतिपादकानि, कानिचित् घटकानीति ।

---

1. -नु…प्रवृत्ति
2. दृष्टादृष्टार्थस्वव्यापारेषु
3. तत्तत्फलप्राप्तौ
4. -प्राप्तौ
5. omitted
6. स प्र...[सा]दादेव सर्वं प्राप्नुवन्ति ।
7. -णैव तेषां
8. अयमर्थश्च प्रणवप्रकृतिभूतेन अकारेण उच्यते । अकारार्थो विष्णुर्जगदुदयरक्षाप्रलयकृदिति अभियुक्तोक्तेः । अत्र प्रलयो द्विविधः । संहारो मोक्षश्च । समस्तशब्दमूलत्वात् अकारस्य अकारार्थो विष्णुः सत्तास्थेमप्रयतनहेतुर्भवति ।
9. अर्थं द्वन्द्वं
10. व्यापकादर्शदृष्टे भगवति व्यापकमन्त्रोऽष्टाक्षरः स एव आदर्शो, दर्पणम् , तत्र संक्षेपतः प्रकाशिते, अयं भावः–श्रीमदष्टाक्षरे पदत्रये व्युत्क्रमात् भगवन्तं[प्रति] विश्वस्य नियमेनाधेयत्वविधेयत्वशेषत्वप्रकाशनात् भगवतश्च नियमेन आधारत्वनियामकत्वशेषित्वसिद्धेः विश्वेश्वरयोः शरीरशरीरिभावसम्बन्धः सूचितो भवति । विश्वस्य तच्छरीरत्वाच्च तदधीनसत्तास्थेमप्रयतनफलं चोक्तं भवति । एवं व्यापकादर्शेन संक्षेपतः विश्वस्य शरीरत्वेन तत एव सत्तादिनिर्वाहकत्वेन दर्शिते भगवति गम्भीराणां
11. चित्तवृत्तिं to जानाति omitted
12. वेदान्तेषु

[1]भेदश्रुतीनां विश्वेश्वरयोः स्वरूपभेदे तात्पर्यम्, अभेदश्रुतीनां तु शरीरवाचिशब्दानां शरीरिपर्यन्तततया तत्तद्विश्ववाचिशब्दानां भगवति शरीरिणि तात्पर्यात् विश्वेश्वरयोः शरीरशरीरिभावे [2]तात्पर्यं न तु स्वरूपैक्यम्, घटकश्रुतीनां विश्वेश्वरयोः शरीरशरीरि भावप्रदर्शने तात्पर्यमिति तात्पर्यरूपचित्तवृत्तिं [3]जानाति । एवं विश्वेश्वरयोः शरीर-शरीरिभावमजानन्तः कुदृष्टयः अभेदश्रुतेः स्वरूपैक्ये तात्पर्यं कल्पयित्वा भेदघटक-श्रुतीः निरर्थकाः कुर्वन्ति । अपरे भेदश्रुत्यर्थं स्वरूपभेदमालम्ब्य तावन्मा[4]त्रतः अभेदघटकश्रुतीः प्रतिक्षिपन्ति । सर्वश्रुतीनां चित्तवृत्तिं न जानन्ति । [5]अस्मन्मत-स्थास्तु मूलमन्त्रसिद्धं [6]शरीरशरीरिभावं जानन्तः सर्वश्रुतीनां तात्पर्यं विदित्वा सर्ववाक्याविरोधेनार्थं निश्चिन्वन्ति[7] । यद्वा " आधेयत्वप्रभृतिनियमैरादिकर्तुः शरीरं सत्ताक्षे[8](स्थे)मप्रयतनफलेष्वेतदायत्तमेतत् । विश्वं " इत्येवंप्रकारेण व्यापकादर्शदृष्टे भगवति पश्यन् व्यापकमन्त्रोऽपि विश्वस्य भगवच्छरीरत्वं तदधी(न)सत्तादिमत्त्वं च प्रतिपादयतीति पश्यन्नित्यर्थः । गम्भीराणामकृतकगिरां चित्तवृत्तिं गाहते, भगवत्पर्यन्ताभिधायित्वरूपतात्पर्यं जानातीत्यर्थः ॥ ९ ॥

---

1. त्रिविधानां वाक्यानां पृथगा(त्मनां)[त्मानं] प्रेरितारं च मत्वा " भोक्ता भोग्यं प्रेरितारं च मत्वा " इति भेदश्रुतयः, सदेव सौम्येदमग्र आसीत्, एकमेवाद्वितीयं, ब्रह्मा नारायणः, शिवश्च नारायणः नारायण एवे(ति देवं)[दं] सर्वं, न द्वितीयो[ऽस्ति] कश्चित् " इत्यादयोऽभेदश्रुतयः,......पृथिव्यां तिष्ठन् पृथिव्या आन्तरो यं पृथिवी न वेद, यस्य पृथिवी शरीरं, य आत्मनि तिष्ठन् आत्मनोऽन्तरो यं आत्मा न वेद यस्यात्मा न शरीरं य आत्मानं अन्तरो यमयति, अन्तः प्रविष्टश्शास्ता जनानां, सर्वात्मा " इत्यादयः घटकश्रुतयः । एतासां अकृतकगिरां भगवति चित्तवृत्तिं तात्पर्यं जानाति। भेदश्रुतीनां
2. निबन्धनादेव तात्पर्यम्
3. जानीते ।
4. -न्मात्रवतः
5. अस्मिन् मतस्था तु
6. विश्वेश्वरयोः शरीर-
7. -न्तीत्यर्थः ।
8. -स्थेम-

अथ उपक्रमश्लोकोक्तं विश्वेश्वरयोः शरीरशरीरिभावरू[1]पसम्बन्धमस्मिन्कलियुगे कश्चिद्वेद, स एक एव वादिनो जेतुं शक्नोती[2]त्याह—

**"यद्येवं[3] यतिसार्वभौमकथितं विद्यादविद्यातमः-**
**प्रत्यूषं प्रतितन्त्रमन्तिमयुगे कश्चिद्विपश्चित्तमः ।**
**तत्रैकत्र झटित्युपैति विलयं तत्तन्मतस्थापना—**
**हेवाकप्रथमानहैतुककथाकल्लोलकोलाहलः ॥ १० ॥**

अन्तिमयुगे कलौ [4]प्रतितन्त्र[म]स्य कृतयुगधर्मत्वात् कलौ तद्वेदनं दुर्लभं इति सूच्यते अन्तिमयुगशब्देन । [5]यतिसार्वभौमेन कथितं भगवत्प्रसादविशेषदृष्टया कथितमित्यर्थः अदृष्टस्य कथनायोगात् । अविद्यातमः प्रत्यूषं अज्ञानान्धकारनिवर्तक-मित्यर्थः । [6]एवं पूर्वश्लोकोक्तं प्रति[7]तन्त्रं विश्वेश्वरयोः शरीरशरीरिभावसम्बन्धरूपं, "स्वतन्त्र एव सिद्धोऽर्थः परतन्त्रैः निराकृतः । प्रतितन्त्रो यथान्याय" इत्युक्तेः । यदि कश्चि[8]द्विद्या[त्] यदिशब्देन भाग्यवशादिति सूच्यते । कश्चिदिति सर्वेषां न सुलभमिति गम्यते । स विपश्चित्तमः सर्वज्ञतमो भवति । [9]तत्रैकत्र पुरुषे [10]तत्तन्म-तानां स्थापनायां साधने निर्वहण इत्यर्थः । यो हेवाकः[11] गर्वः तेन तावन्मात्रेणैव प्रथमानाः प्रथां गता ये हैतुकाः शुष्कतार्किकाः तेषां कथाः वादजल्पवितण्डारूपाः

---

1. -रूपः संप्रति तं तं सिद्धान्तं अस्मिन्
2. -त्याह-यद्येतमिति ।
3. -तं in-R. S.
4. प्रतितन्त्रसिद्धान्तस्य
5. यतिराजेन भगवत्प्रसादेन वि-
6. एतं
7. -तन्त्रसिद्धान्तरूपं
8. -द्विद्यात्
9. तस्मिन्नेकस्मिन्नेव पु-
10. तन्मतस्थापनायामसाध-
12. हे चेति पुरुषं वालयवीति(?)हेवाकः

[1]ता एव कल्लोला: तेषां कोलाहल: कलकलध्वनि: । [2]औपम्य(पथि)[प्रति]कक्ष्योपन्यासरूप: झटिति विलयं याति [3]अ[ा]द्यकक्ष्यायामेव नाशं याति । एतत्प्रतितन्त्रवेदिनां पुरत: सङ्घश: क्षणमात्रं स्थातुं न शक्ता: पलायन्त इति भाव: ॥ १० ॥

## ॥ अर्थपञ्चकाधिकार: चतुर्थ: ॥

[4]अथ (अर्थ) पञ्चकाधिकारपद्ययोराद्येन मूलमन्त्रे अर्थपञ्चकप्रतिपादकस्थलानि दर्शयन् एवंवेदी [5]सर्ववेदी भवतीत्याह—

**आदौ प्राप्यं परम(मनघं)[पुरुषं] (प्राप्य) [प्राप्तृ] रूपं च मादौ**
**इष्टोपायं त्वयननमसोरीप्सितार्थं चतुर्थ्याम् ।**
**तद्व्याघातं ममकृतिगिरि व्यञ्जयन्तं मनुं तं**
**तत्प्रायं च द्वयमपि विदन् सम्मत:सर्ववेदी ॥ ११ ॥**

[6]अ: आदि: यस्य तस्मिन्, [7] आदिशब्देन नारायणपदमुच्यते । अकारे, नारायणपदे, अनघं समस्तहेयरहितम् । परमं [8]सकलकल्याणैकतानं, प्राप्यं ब्रह्म व्यञ्जयन्तमित्यनुषज्यते । मादौ—म: आदि: [9]यस्य तस्मिन्, [10] आदिशब्देन

---

1. तासां कोलाहल:
2. उपर्युपरिकक्ष्योपन्यासरूप: झटिति
3. आद्यकक्ष्या
4. आदौ अथ अर्थपञ्च-
5. सर्वज्ञो वेदी भवतीत्याह-आदविति ।
6. अ: Omitted
7. यस्य स: आदि: अकारादय: तत्र अकारे नरशब्दनारायणशब्दे च
8. सकल...तानं Omitted
9. -स्य मादौ मकारनरशब्देषु प्राप्तु—
10. तस्मिन् Omitted

नारपदमुच्यते । मकारे नारशब्दे च प्राप्तुश्चेतनस्वरूपं[1] व्यञ्जयन्तं, अयननमसोः पद्योः इष्टोपायं अभिमतसाधनं, सिद्धसाध्यरूपेण द्विविधं व्यञ्जयन्तं, चतुर्थ्यां नारायणपदस्थायां, ईप्सितार्थं अभिमतकैङ्कर्यरूपं फलं व्यञ्जयन्तं, ममकृतिगिरि ममकारवाचिनमः[2]पदस्थे मकारे तद्व्याघातं, तस्य फलस्य[3] अहङ्कारममकारात्मकं विरोधिनं व्यञ्जयन्तं, तं मनुं—मूलमन्त्रं, तत्प्रायं प्रायशब्दोऽत्र प्रकारवचनः, तत्प्रकारं द्वयं च मूलमन्त्रवत्तत्तदुचितस्थलेषु अर्थपञ्चकं व्यञ्जयन्तम् । तथाहि—[4]श्रीमन्नारायणादिशब्देषु प्राप्यं ब्रह्म,[5] उत्तमपुरुषे[6] प्राप्तारं जीवं, शरणं प्रपद्य इति पदयोरुपायं, उत्तरखण्डगतचतुर्थ्योः फलं च[7] प्रतिपादयति । सर्ववे(द)[दी]सम्मतः सर्वज्ञ इति सद्भिः समर्थ्यत इति ।

[8]व्याख्यान्तरे—अनेनैव मूलमन्त्रेण "प्राप्यस्य ब्रह्मणो रूप" मित्यादिप्रमाणप्रतिपादितमर्थपञ्चकं प्रतिपाद्यत इत्याह—आदाविति । आदावित्यादिशब्देन नारपदं लुप्तचतुर्थी च प्रतिपाद्यते । मकारे नारपदे चतुर्थ्यां च प्राप्तुः जीवस्य रूप व्यञ्जयन्तमित्यनेन सम्बन्धः । इष्टोपायं इष्टस्य परमपुरुषार्थस्य उपायं साधनं, चतुर्थ्यां—व्यस्तचतुर्थ्यां, तत्प्रायं तेन मनुना तुल्यम् ॥ ११ ॥

अथ द्वितीयपद्येन अर्थपञ्चकानुसन्धानक्रमं स्वानुसन्धानमुखेन दर्शयति[9]—

---

1. -नस्य रूपं
2. वाचिनर्निमरशब्दे (?) नमः शब्दसम्बन्धिनि मकार इत्यर्थः ।
3. -स्य च विरोधि च व्यञ्जय-
4. द्वयं श्री-
5. ब्रह्म प्रतिपाद्य
6. -षेण
7. च प्र-दयति Omitted
8. व्याख्या-तुल्यम् Omitted
9. -ति-प्राप्यमिति ।

**प्राप्यं ब्रह्म समस्तशेषि परमं प्राप्ताऽहमस्योचितः**
**प्राप्तिर्दायधनक्रमादिह मम प्राप्ता स्वतस्सूरिवत् ।**
**हन्तैनामतिवृत्तवानहमहम्मत्या विमत्याश्रयः**
**सेतुस्सम्प्रति शेषसंपदि भर (शेषिदम्पतिभर)* न्यासस्तु**
**मे शिष्यते ॥ १२ ॥**

समस्तशेषी सर्वजगतः स्वामी परमं ब्रह्म प्राप्यं सर्वेषामनुभवनीयं वस्तु, अस्य प्राप्यस्य, अहमुचितः प्राप्ता योग्योऽनुभविता । [1]मम इह प्राप्ये सूरिवत् अनन्तगरुडादीनामिव दायधनक्रमात् पुत्रस्य पितुर्धने[ऽ]छद्म[2]तोंऽशप्राप्तिन्यायेन प्राप्तिरनुभवयोग्यता स्वतः प्राप्ता स्वतस्सिद्धा एतां [एनां] प्राप्तिं विमत्याश्रयः अनाद्यज्ञानसंश्रयोऽहं अहम्मत्या अहङ्कारेण, स्वातन्त्र्येण विरोधिनाऽतिवृत्त-वानस्मि परित्यज्य स्थितोऽस्मि । हन्तेति[खे]दे । एवं स्थिते सम्प्रति मे प्राप्याननुभवात्, दूरमुज्झितस्य शेषसम्पदि शेषभूतस्य सम्पत् भगवदनुभवकैङ्कर्यं तस्यां सेतुः साधनं संसारसमुद्रनिस्तारोपायश्च, भरन्यासस्तु आत्मरक्षानिक्षेप एव । [3]तुशब्दोऽवधारणे । शिष्यतेऽवशिष्टः । अज्ञत्वादशक्तत्वाच्च भरन्यास एव मे अधिकारो नान्यत्रेति ।

[4]व्याख्यान्तरे—समस्तस्य चेतनाचेतनात्मकस्य जगतः शेषी स्वामी । तत्र हेतुमाह—परममिति । निखिलहेयप्रत्यनीककल्याणैकतानतया सर्वोत्तरमित्यर्थः । ब्रह्म प्राप्यं[न]स्वर्गादयः । तेषां हेयप्रत्यनीकताद्यभावेन प्राप्याभासरूपत्वात् । अहं शेषभूतः । अस्य ब्रह्मण उचितः निरुपाधिकः प्राप्ता तदनुभवजनित[प्रीति]-कारितकैङ्कर्यरूपफलभाक् । मम प्राप्तुः प्राप्तिः फलं कैङ्कर्यमिति यावत् । दायधन-क्रमात् ज्ञातित्वप्राप्तधनन्यायेन सूरिवत् स्वतः उपाधिं विना प्राप्ताऽर्हः अहं देहात्मा-

---

* In R. S.

1. तस्य before मम
2. जन्मतोंऽशः
3. दुरवधारणे (?)
4. व्याख्या……निष्कर्षः omitted

मिमानस्वतन्त्राभिमानरूपाया: विमतेः विपरीतज्ञानस्य आश्रयस्सन् ममकाररूपया बुद्धया एनां प्राप्तिमतिवृत्तवान् अतिक्रान्तोऽस्मि । हन्तेति खेदे । संप्रति संसार-दशायां मे शेषभूतस्य शेषसम्पदि कैङ्कर्यसाम्राज्ये विषये भरन्यासः प्रपत्तिः, सेतुः संसारोत्तारसाधनं शिष्यते । भक्तावधिकाराभावात् प्रपत्तिरेव शिष्यत इति भावः । परमपुरुषः प्राप्यः, संसारी चेतनः प्राप्ता, भगवत्कैङ्कर्यप्राप्तिः फलं, तद्विरोधिनौ अहङ्कारममकारौ, उपायस्तु प्रपत्तिः, इत्यर्थपञ्चकनिष्कर्षः ॥ १२ ॥

## ॥ तत्त्वत्रयचिन्तनाधिकारः पञ्चमः ॥

अथ तत्त्वत्रयाधिकारपद्ययोः आद्येन तत्त्वत्रयविवेचनफलं दर्शयन् श्रुतिषु लक्षणतो विभक्तं तत्त्वत्रयमस्माकमाचार्या[1] उपदिष्टवन्त इत्याह[2]—

**प्रकृत्यात्मभ्रान्तिर्गलति चिदचिल्लक्षणधिया**
**तथा जीवेशैक्यप्रभृतिकलहस्तद्विभजनात् ।**
**अतो भोक्ता भोग्यं तदुभयनियन्तेति निगमैः**
**विभक्तं नस्तत्त्वत्रयमुपदिशन्त्यक्षतधियः ॥ १३ ॥**

चिदचिल्लक्षणधिया चेतनाचेतनयोः लक्षणज्ञानेन, प्रकृत्यात्मभ्रान्तिः प्रकृतिविकारे देहे अहमित्यात्मभ्रान्तिः गलति नश्यतीत्यर्थः । तथा तद्वदेव जीवेशैक्यप्रभृतिकलहः जीवपरमात्मनोरैक्यं स्वरूपैक्यं प्रभृतिः यस्य स चासौ कलहश्च । [3]प्रभृतिशब्देन परि-

1. -चार्योप-
2. -ह-प्रकृत्येति ।
3. प्रभृतिशब्देन भेदाभेदौ विपर्ययादिः गृह्यते । एवंरूपो विवादः तद्विभजनात् जीवेशयोः लक्षणेन विभजनात् विभागज्ञानात् गलतीत्यनुषज्यते । अतः एवं तत्त्वत्रय-ज्ञानस्य उत्तरभ्रान्तिज्ञाननिवर्तकत्वात्, "भोक्ता भोग्यं प्रेरितारं च मत्वे"त्यादि-निगमैः विभक्तलक्षणतो विभज्य दर्शितं, पराधीनभोक्तृत्वं जीवासाधारणो धर्मः । ज्ञातृ-त्वादिरहितं भोग्यत्वं अचितो लक्षणम् । स्वतः प्रेरकत्वमीश्वरलक्षणमिति विभक्तं तत्व-त्रयं आचार्या अस्माकं उपदिष्टवन्त इति ॥ 13 ॥ अथ तत्वत्रया—

माणादिकं सूच्यते । तयोः जीवेशयोः, विभजनात् असाधारणधर्मवत्तया निरूपणात् । जीवासाधारणधर्माः नियाम्यत्वशेषत्वादयः । ईश्वरासाधारणधर्मास्तु नियन्तृत्वशेषित्वादयः । गलतीत्यनुषज्यते । अतो विपरीतज्ञानस्य निरस्तत्वात् भोक्ता जीवः, भोग्यं प्रकृतिः, तयोः प्रकृतिपुरुषयोरुभयोः नियन्ता ईश्वर इत्यनेन प्रकारेण "भोक्ता भोग्यं प्रेरितारं च मत्वे" त्यादिनिगमैर्विभक्तं पृथक्कृत्य निरूपितं तत्त्वानां चिदचिदीश्वराणां त्रयं अक्षतधियः समग्रज्ञानाः नाथादयः जिज्ञासूनां अस्माकमुपदिशन्ति । परा(भिप्रायो)[धीनभो]क्तृत्वं जीवासाधारणधर्मः, ज्ञातृत्वादिरहितं भोग्यत्वं अचिदसाधारणधर्मः, स्वतःप्रेरितृत्वं ईश्वरासाधारणधर्म इति द्रष्टव्यम् ॥ 13 ॥

अथ तत्त्वत्रयाधिकारान्तिमपद्येन जगति कुहनायुक्तिपरिकल्पिताः बहवस्तत्त्वविषयाः सिद्धान्ताः सन्ति । ते सर्वे [1]सर्वश्रुतिप्रमाणदृढीकृततत्त्वत्रयप्रतिपादकेनास्मत्सिद्धान्तेन निर्धूता भवन्तीत्याह[2]—

**आवापोद्वापतः स्युः कति कति कविधीचित्रवत्तत्तदर्थेष्वा-**
**नन्त्यादस्तिनास्त्योरनवधिकुहनायुक्तिकान्ताः कृतान्ताः ।**
**तत्त्वालोकस्तु लोप्तुं प्रभवति सहसा निस्समस्तान् समस्तान्**
**पुंस्त्वे तत्त्वेन दृष्टे न हि भवति पुनः प्राणितास्थाणुताधीः ॥ १४ ॥**

तत्तदर्थेषु तेषु तेष्वर्थेषु [3]तत्स्वरूपेषु । अस्तिनास्त्योः[4] अस्तित्वनास्तित्वकल्प-[5]नानामानन्त्यात् । एवं कल्पने हेतवः कुहनायुक्तयः आवापोद्वापतः, आवापः अविद्यमानस्य प्रक्षेपः, उद्वापः [6]विद्यमानस्य त्यागः ताभ्यामविद्यमानस्यास्तित्वं परिकल्प्य [7]प्रक्षेपात्, विद्यमानस्य नास्तित्वं परिकल्प्य परिहाराच्चेत्यर्थः ।

---

1. सर्व omitted
2. -ह- आवापेति ।
3. तच्चरूपेषु
4. –नास्त्योरानन्त्यात्
5. -नामनन्तत्वात्
6. विद्यामानस्य परित्यागः उद्वापः ताभ्यां
7. -कल्प्य तेषु प्र-

अनवधिकुहनायुक्तिकान्ता: असङ्ख्यातै: कुतर्कै: कान्तवदवभासमाना: [1]कृतान्ता: सिद्धान्ता: बाह्यकुदृष्टिकल्पिता: [2]कविधीवत् कविबुद्धिवत् चित्रकर्मवच्च कति कति स्यु: अनेकधा भवेयु: । तान् कुहनायुक्तिपरिकल्पितान् सिद्धान्तान् , तत्त्वालोक: तत्त्वज्ञानं तत्त्वानां यथावस्थित: प्रकाश: तत्त्वत्रयरूपोऽस्मत्सिद्धान्त इति भाव: । निस्सम: प्रबलस्सन् , सहसा बलात्कृत्य अतर्कितं वा लोप्तुं प्रभवति, नाशयितुं शक्नोति । अत्र दृष्टान्तमाह—पुंस्त्व इति[3] । पुंस्त्वे तत्त्वेन याथार्थ्येन दृष्टे सति प्राणी वा स्थाणुर्वेति धी: पुनश्च न भवति हि । प्राणितास्थाणुतादिरिति पाठे अयमर्थ:—दूरत: पुरोवर्तिनि कस्मिंश्चिद्वस्तुनि दूरस्थितपुंस: स्थाणुर्वा पुरुषो वा शिलास्तम्भो वा गौर्वाऽश्वो वेति बहुशिरस्क: संशयो जायते । [4]तत्समीपं गतस्य शिर:[5](प्रा)[पा]ण्यादिदर्शनात् [6]यथावत् ज्ञाते सति पश्चात् स्थाणुत्वादिसंशयकोटिर्न[7] ॥ १४ ॥

## ॥ परदेवतापारमार्थ्याधिकार: षष्ठ: ॥

अथ परदेवतापारमार्थ्याधिकारपद्ययोराद्येन कुदृष्टिनिर्णया: नाद्रियन्ते, वेदान्तसिद्धान्तिभि: व्यासादिभि: यन्निर्णीतं सत्यं सत्यमित्यादिभि: तदेव[सन्त:] परिगृह्णन्तीत्याह[8]—

---

1. कृतान्ता omitted
2. -धीचित्रवत् कवीनां धीवैचित्र्यवत् धीशब्देन धीपरिकल्पिता: अर्था: उपलक्ष्यन्ते । कश्चित् कवि: कश्चिदर्थं स्वबुद्धिविकासेन केनचित्प्रकारेण परिकल्प्य प्रणयति तमन्योऽन्यप्रकारेण अप(रेण)[रो] अन्यादृशप्रकारेणेत्येवं तद्विषयेष्वपि उत्प्रेक्षया कल्पनानि कति कति स्यु: बहवस्सन्तीत्यर्थ: । तेन एतान् कुहनायुक्ति-परिकल्पितान्
3. पुंस्त्वे दृष्टे दूरत: पुरोवर्तिनि.........
4. तस्य समी-
5. पाण्यादि
6. यथावज्ज्ञाते
7. -र्न प्रवर्तते खलु प्राणिता जीविष्यति खलु यथा नश्यति तद्वदिति ॥ 14 ॥
8. -ह-आत्मैक्यमिति।

आत्मैक्यं देवतैक्यं त्रिकसमधिगता तुल्यतैक्यं त्रयाणा-
मन्यत्रैश्वर्यमित्याद्यनिपुणफणितीराद्रियन्ते न सन्तः ।
त्रय्यन्तैरेककण्ठैस्तदनुगुणमनुव्यासमुख्योक्तिभिश्च
श्रीमान्नारायणो नः पतिरखिलतनुर्मुक्तिदो मुक्तभोग्यः ॥ १५ ॥

आत्मैक्यं जीवपरमात्मनोः जीवानां च स्वरूपैक्यं, देवतैक्यं ब्रह्मविष्णु-शिवे[1]न्द्रादिदेवतानां स्वरूपैक्यं, त्रिकसमधिगता तुल्यतां[2], त्रिकं ब्रह्मविष्णु-रुद्ररूपमूर्तित्रयं त[3]त्प्राप्ता तुल्यता त्रयोऽपि समानाः न्यूनाधिकतारहिता इति पक्षः । त्रयाणामैक्यं त्रयाणां मूर्तीनां [4]स्वरूपैक्यं, अन्यत्रैश्वर्यं त्रिभ्य इति विभक्तिविपरिणामः कार्यः, अध्याहारो वा, त्रिमूर्तिभ्योऽन्यत्र सन्मात्रब्रह्मणि सदाशिवे वा ईश्वरत्वं न त्रिमूर्तिष्विति पक्षश्च इत्याद्यनिपुणफणितीः, इतिशब्दः प्रकारवाची, इत्येवमादीनि अनिपुणानां मूढानां वचनानि यद्वा अनिपुणानि वचनानि, वचनैः प्रतिपादितान् पक्षानित्यर्थः । नाद्रियन्ते न परिगृह्णन्ति । अतो नोऽस्माकं अखिलतनुर्मुक्तिदो मुक्तभोग्यः श्रीमान्नारायणः[5] जगतः पितरावादिदम्पती लक्ष्मीनारायणावेव शेषिणौ परमौ, यद्वा [6]नः जगतामित्यर्थः । अतः लक्ष्मी-नारायणावेव सर्वस्मात्परौ । कुत इदमवगम्यते त्रय्यन्तैरित्यादि । एककण्ठैः

---

1. -न्द्रादयः तेषां स्वरू-

2. तुल्यता

3. तत्र प्राप्तातुल्या त्रयो

4. स्वरूपतः ऐक्यं

5. श्रीमन्नारायणः पतिः अखिलतनुः अखिलाः ब्रह्मरुद्रेन्द्राः तनवः शरीराणि यस्य । अनेन ब्रह्मादिभिः विष्णोः स्वरूपैक्यं नास्तीति सूच्यते । किन्तु शरीरशरीरि-भावप्रयु(क्ता)[क्तं]विशिष्टैक्यमेवेति । मुक्तिदः मोक्षप्रदः । अन्येषां मुक्तिप्रदाने सहका-रित्वमेवेति सूच्यते । मुक्तानां भोग्यभूतश्च । एवंभूतः श्रीमन्नारायणः । जगतः पितरौ आदिदम्पती लक्ष्मीनारायणावेव ।

6. न जगतिमि-

[1]अन्योन्यगन्धरहितैः [2]यद्यप्यापाततः परस्परविरोधः प्रतीयते, अथापि विश्वेश्वरयोः शरीरशरीरिभावस्य वेदान्तोक्तत्वात्, शरीरवाचिशब्दानां शरीरिपर्यन्ताभिधान-न्यायेन छागपशुन्यायेन च [3]ब्रह्मादिशब्दानां विशिष्य[4]नारायण एव पर्यवसानस्य न्याय्यत्वात् सर्वाभिरुपनिषद्भिर्नारायण एवोच्यत इति सर्वा उपनिषदो भगवत्येक-कण्ठा एव। तदनुगुणाभिरुपनिषदां सरणिभिश्च—

"नराज्जातानि तत्त्वानि नाराणीति ततो विदुः।
[5]यदस्यायतनं प्रोक्तं तेन नारायणः स्मृतः॥
सत्यं सत्यं पुनस्सत्य[6]मुद्धीक्ष्य भुजमुच्यते"।
इत्याद्युक्तिभिरेव निर्णयः[7] ॥ १५ ॥

अथ परदेवतापारमार्थ्या[8]न्तिमेन पद्येन जगति बहुषु कश्चिद्वि[9]दितवेदान्तार्थः ब्रह्मादीनश्वरान् [10]ज्ञात्वा श्रियःपतिमेव परदेवतात्वेन गतिं पश्यतीत्याह[11]—

**जनपदभुवनादिस्थानजैत्रासनस्थे-**
**ष्वनुगतनिजवार्तं नश्वरेष्वीश्वरेषु।**
**परिचितनिगमान्तः पश्यति श्रीसहायं**
**जगति गतिमविद्यादन्तुरे जन्तुरेकः ॥ १६ ॥**

---

1. -न्योन्यविरोधगन्धरहिता भगवत्येवाभिमुख्यैः।

2. -पि सदेव सौम्येदमग्र आसीत्, असद्वा इदमग्र आसीद, ब्रह्म वा इदमेकमेवाग्र आसीत्, आत्मा वा इदमेकमेवाग्र आसीत्, एको ह वै नारायण आसीत्, न च सन् न चासच्छिव एव केवलः, इत्यादिषु आपा-

3. सदब्रह्मा-

4. विशेष-

5. तावदस्या... क्तो तेन

6. मुध्दृत्य

7. -य इति ॥ 15 ॥

8. -थ्र्याधिकारान्ति-

9. -श्चिदस्ति वि-

10. विदित्वा

11. -ह-जनपदेति।

अविद्यया अज्ञानेन दन्तुरे विषमे इह जगति एको जन्तुः जनः बहुषु कश्चिदिति भावः। वेदान्तपरिचयात्पूर्वं तस्य जन्तुत्वमेव, ज्ञानानन्तरमेव मनुष्यत्वमिति सूच्यते। परिचितनिगमान्तः सम्यगधीतवेदान्ततात्पर्यस्सन् जनपदाः देशाः *भुवनं लोकः, आदिशब्देन त्रैलोक्यं ब्रह्माण्डञ्च गृह्यते। एतेषां स्थानानां यज्जैत्रासनं सिंहासनं, देशसिंहासनं भुवनसिंहासनं त्रैलोक्यसिंहासनं अखण्डाधिपत्यसिंहासनं च तत्स्थितेषु ईश्वरेषु देशाधिपतयो राजा(नं)[नः]भुवनाधिप(ति)[तयः] चक्रवर्तिनः, त्रैलोक्याधिपतयः इन्द्रादयः, ब्रह्माण्डाधिपतयश्चतुर्मुखाः, तेष्वनुगतनिजवा(र्ता)[र्तं]अनुगताः अनुसृत्य गता नष्टाः निजवार्ताः कथाः यस्मिन् कर्मणि तथा नश्वरेषु नष्टशीलवत्सु तान् वनचरान् ज्ञात्वेत्यर्थः। श्रियः पतिमेव परमं पुरुषं गतित्वेन निश्चिनोतीत्यर्थः ॥ १६ ॥

॥ मुमुक्षुत्वाधिकारस्सप्तमः ॥

अथ मुमुक्षुत्वाधिकारपद्ययोराद्येन लीला[वि]भूतेः भयनुत्तां परमपद्भोग्यतां च शास्त्रमुखेन जानतां मुमुक्षा स्वयमेव सिध्येदित्याह—कालावर्तानिति।

**कालावर्तान् प्रकृतिविकृतीः कामभोगेषु दोषान्**
**ज्वालागर्तप्रतिमदुरितोदर्कदुःखानुभूतिम्।**
**याथातथ्यं स्वपरनियतं यच्च दिव्यं पदं तत्**
**काराकल्पं वपुरपि विदन् कस्तितिक्षेत बन्धम् ॥ १७ ॥**

कालस्य[आ]वर्ताः भ्रम[णानि-ता]न् कालविकाराणां स्वसमीपवर्तिग्रसनसाम्यात् आवर्तत्वम्। कालविकारैः बृन्दादयश्च निगीर्य(ते)[न्ते]।

---

* From भुवनं लोकः to व्याकृति (in the page 29) taken from the R. No. 8765 ms.

यथा— "महाबला महावीर्या अनन्तधनसञ्चयाः ।
गताः कालेन महता कथाशेषा नराधिपाः ॥

एवं कालवर्तान् जानतां मुमुक्षा जायते ।

श्रुत्वैतान् पुत्रदारादौ गृहक्षेत्रादिकेऽपि वा ।
द्रव्यादौ वा कृतप्रज्ञः कः कुर्यान्म[म]तां नरः ॥

इत्यादेः । तथा प्रकृतिविकृतीः प्रकृतेः विकारान् ब्रह्मादिस्थानानि ।
"अत एव हि नेच्छन्ति स्वर्गप्राप्तिं मनीषिणः" ।

इत्यादेः ।

"आब्रह्मभवनादेषु दोषास्सन्ति महामुने ।
तथा कामभोग्येषु दोषान् विदन्—
मांसासृक्पूयविण्मूत्रस्नायुमज्जास्थिसंहते ।
देहे चेत् प्रीतिमान् मूढः भविता नरकेऽपि सः ।"
"स्तनौ मांसग्रन्थी कनककलशावित्युपमितौ"

इत्यादिभिः ज्वालागर्तप्रतिमा या दुरितानां दुष्कृतानां उत्तरत्र यमलोकादौ फलभूता दुःखानुभूतिः दुःखानुभवः, तां च विदन्, किञ्च याथातथ्यं स्वपरनियतं स्वस्मिन् नियतं [याथातथ्यं] स्वाभाविकाकारः भगवच्छेषभूतस्य भगवदनुभव-कैङ्कर्यस्य परतया वर्तनरूपः, परस्मिन् ब्रह्मणि नियतं याथातथ्यं स्वाभाविकाकारः सकलहेयप्रत्यनीक(:)[त्व]सकलकल्याणगुणाकरत्वादिरूपः, तथा विदन्, यथास्वरूपं तथा वर्तत इति यथातथः तस्य भावः याथातथ्यं, यच्च दिव्यं परमं पदं अस्ति । तच्च—

"ब्रह्मणः सदनादूर्ध्वं तद्विष्णोः परमं पदम् ।
रम्याणि कामवाराणि विमनानि सभास्तथा ॥

आक्रीडा विविधा राजन् पद्मिन्यश्चामलोदकाः ।
एते वै निरयास्त[स्य] स्थानस्य परमात्मनः ॥"

इत्युक्तं काराकल्पं वपुरपि विदन् दुःखाकरत्वसम्पदनुभवप्रतिबन्धकत्वादिभिः बद्धकारालयसदृशं वपुः—

देहः कारालयात्कष्टो नरकादपि कुत्सितः ।
मोक्षेच्छां जनयेत्कारा दे(हे) [हः] स्वस्मिन् रतिं सदा ॥

इत्युक्तेः, विदन् जानन्, कालवर्तादीन्, एषु एकं जानतोऽपि मुमुक्षा भवति । एतत्सर्वं जानतो मुमुक्षासिद्धौ कस्संशय इति भावः । कः पुमान् संसारबन्धं तितिक्षेत सोढुं शक्नुयात् । तदेव मुमुक्षुर्भवतीत्यर्थः ॥ १७ ॥

अथ मुमुक्षुत्वाधिकारान्तिमेन पद्येन दैवात् कश्चिदेव मुमुक्षुर्भवतीत्याह— विषमध्विति ।

**विषमधु बहिष्कुर्वन् धीरो बहिर्विषयात्मकं**
**परिमितरसस्वात्मप्राप्तिप्रयासपराङ्मुखः ।**
**निरवधिमहानन्दब्रह्मानुभूतिकुतूहली**
**जगति भविता दैवात् कश्चिज्जिहासितसंसृतिः ॥ १८ ॥**

[1]इति इह जगति दैवात् भाग्यवशात् कश्चिद्धीरः दृढबुद्धिः सन् बहिर्विषयात्मकं बहिर्विषयाः शब्दादयः तदात्मकं विषसक्तं मधु विषमिव विषमधु आपाततो मधुरत्वात् पश्चात् दुःखजनकत्वाच्च विषमधुत्वरू(पि)[प]णं, बहिष्कुर्वन् परित्यजन् । किञ्च परिमितरसा भगवदनुभवापेक्षया अल्पास्वादा या स्वात्म[प्रा]प्तिः केवलात्मानुभवः, तत्र तद्विषयप्रयासात् तदर्थप्रयासात्, पराङ्मुखः अल्पास्थिरत्वादिदोषादेवेति भावः । अपि च निरवधीत्यादि । निरवधिको महानन्दो यस्य तच्च तत् ब्रह्म च भगवान् वासुदेवः तस्यानुभवे देशविशेषसम्बन्धिनि कुतूहली भविता[2](तिः)परमपदस्थभगवदभिलाषी भवति ॥ १८ ॥

---

1. Perhaps seribs mistake.
2. ति-Scribs mistake.

## ॥ अधिकारिविभागाधिकारोऽष्टमः ॥

अथाधिका(र)[रि]विभागाधिकारपद्ययोराद्येन पद्येन भक्तिप्रपत्त्यधिकारिणोरुभयोः मुमुक्षुत्वे समानेऽपि शक्तत्वाशक्तत्वाद्याकारभेदात् भक्तिप्रपत्त्योः स्थितिर्व्यवस्थितेत्यत आह—मुमुक्षुत्व इति ।

मुमुक्षुत्वे तुल्ये सति च मधुविद्यादिषु यथा
व्यवस्था संसिध्यत्यधिकृतिविशेषेण विदुषाम् ।
विकल्प्येत न्यासे स्थितिरितरविद्यासु च तथा
नियत्या वैयात्यं नियमयितुमेवं प्रभवति ॥ १९ ॥

मुमुक्षुत्वे समाने सत्यपि विदुषामधिकारिणां अधिकारविशेषेण वस्वादिपदप्राप्तिपूर्वकब्रह्मप्राप्तिकामनारूपाधिकारभेदेन मधूपासनादौ यथाधिकारव्यवस्थानियमः सिध्यति, तया व्यवस्थयैव न्यासे इतरविद्यासूपासनादिषु स्थितिः प्रवेशः विकल्प्येत व्यवस्थया विकल्प्यते अधिकारभेदात् । एवमत्र व्यवस्थापकं किमित्यत आह—नियत्ये)[त्याइ]ति । नियत्या विधेः वैयात्यं सामर्थ्यं, एवं नियमयितुं व्यवस्थापयितुं शक्नोति । तत्तददृष्टमेव शक्ताशक्तत्वाधिकारजनकद्वारा भक्तिप्रपत्त्योः तां नियमयितुं समर्थमित्यर्थः ॥ १९ ॥

अथाधिका(र)[रि]विभागाधिकारान्तिमेन पद्येन भक्तिप्रपत्त्योरेव साक्षात् मोक्षसाधनत्वं, तयोः भक्तिनिष्ठस्य फलप्राप्तिर्विलम्बते, भजनसुखमधिकमस्ति, प्रपन्नस्य तु शीघ्रं फलसिद्धिः, जीवितदशाया अल्पत्वमेव सुखमिति दर्शयन् [—आह प्रपन्नादिति] ।

प्रपन्नादन्येषां न दिशति मुकुन्दो निजपदं
प्रपन्नश्च द्वेधा सुचरितपरीपाकभिदया ।
विलम्बेन प्राप्तिर्भजनसुखमेकस्य विपुलं
परस्याशु प्राप्तिः परिमितरसा जीवितदशा ॥ २० ॥

प्रपन्नश्च सुचरितपरीपाकभिदया सुकृतपरिपाकभेदात् द्वेधा भिन्नः स्वतन्त्रप्रपन्नोऽङ्गप्रपन्नश्चेति । अङ्गप्रपन्नस्तु भक्तिनिष्ठ इत्युच्यते । तत्र एकस्य अङ्गप्रपन्नस्य भक्तस्य ब्रह्मप्राप्तिर्विलम्बते, प्रारब्धशरीराणां वासनाभावित्वात्, इह भजनसुखं भक्तियोगेन भगवदनुभवरूपं सुखमधिकम् । परस्य स्वतन्त्रप्रपन्नस्य आशु प्राप्तिः वर्तमानदेहावसान एव ब्रह्मप्राप्तिः । मुमुक्ष्ववस्था तु जीवितदशा अल्पास्पदा वर्तमानदेहे भगवदनुभवरूपं सुखमल्पमित्यर्थः ॥ २० ॥

## ॥ उपायविभागाधिकारो नवमः ॥

अथ उपायविभागाधिकारपद्ययोराद्येन भगवानेव स्वप्राप्तये स्वयमेव साक्षादुपायः । तस्य वशीकरणाय विहिते भक्तिप्रपत्ती व्यवहितोपाये । तयोः प्रवेशश्च पुंसां महासुकृतविशेषेण (भगवति) [भवति] । महति सुकृतविशेषे च करणकलेबरदाता स एव निदानमित्याह—उपाय इति ।

**उपायस्स्वप्राप्तेरुपनिषदधीतस्स भगवान्**
**प्रसक्त्यै तस्योक्तेः प्रपदननिदिध्यासनगती ।**
**तदारोहः पुंसस्सुकृतपरिपाकेन महता**
**निदानं तत्रापि स्वयमखिलनिर्माणनिपुणः ॥ २१ ॥**

स्वप्राप्तेः स्वयसुपायः स भगवानेव[श्रु]तः । कीदृश (इत्यर्थः?) इत्यत आह—उपनिषदधीतस्स्वप्राप्तेः स्वयमेव साधनतया उपनिषत्सु जोघुष्यमाणः यथा "नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्यः" "अमृतस्यैष सेतुः" "तमक्रतुं पश्यति वीतशोकः धातुः प्रसादान्महिमानमीशम्" "एष एव साधु कर्म कारयति यमेभ्यो लोके(भ्यो)[भ्यउ]न्निनीषती" त्यादिभिः । तस्य मोक्षे साक्षादुपायभूतस्य भगवतः प्रसादनाय वशीकरणायेत्यर्थः । प्रपदननिदिध्यासनगती न्यासोपासनमा(र्गण)[र्गौ] उक्तौ । तदारोहः तयोः प्रवेशः पुंसः सुकृतरिपाकेन महता भवति । तत्रापि महति सुकुतपरिपाके निदानं आदिकारणं स्वयमखिलनिर्माणनिपुणः स एव स्वयमेव प्रधानकर्ता

भूत्वा सर्वजगत्सृष्टिसमर्थः करणकळेबरादिद्वारा तादृशसुकृतोत्पादकत्वादिति भावः ॥ २१ ॥

अथोपायविभागाधिकारान्तिमेन पद्येन कृतिनः कर्मादीनां चतुर्णां योगिनां स्वरूपभावं च सम्यग्विचार्य कर्मादीनां चतुर्णां त्रयाणां दौष्कर्यादिदोषदुष्टतया प्रपत्तेर्निर्दोषतया च तत्रैव रमन्त इत्याह—कर्मेति ।

कर्म ज्ञानमुपासनश्च शरणव्रज्येति चावस्थितान्
सन्मार्गानपवर्गसाधनविधौ सद्वारकाद्वारकान् ।
एकद्व्याकृतियोगसंभृतपृथग्भावानुभावानिमान्
सम्यक्प्रेक्ष्य शरण्यसारथिगिरामन्ते रमन्ते बुधाः ॥ २२ ॥

बुधाः बुद्धिमन्तः कृतिनः[कर्म]कर्मयोगः[ज्ञानं]ज्ञानयोगः उपासनं भक्तियोगः शरणव्रज्याः[1] शरणागताः प्रपत्तिश्च इत्येवंरूपेणावस्थितान् सन्मार्गान् उपायः[2] सन्तश्च ते मार्गाश्च, सतां मार्गाः समीचीनानुपायान् , ऐश्वर्यकैवल्यभगवदनुभवरूपफलानि प्रतीति भावः । अपवर्गसाधनविधौ मोक्षसाधनकर्मणि [अ]द्वारकान् सद्वारकान्[3] सद्वारका[4] सद्वारका व्यवहिताः परम्परयो[5](रु)पाया इत्यर्थः । अद्वारकाः साक्षादुपायाः । तत्र कर्मयोगज्ञानयोगौ मोक्षे सद्वारकौ परम्परयोपायभूतौ । भक्तिप्रपत्ती तु अद्वारकौ साक्षादुपायौ । ताने[तान्] एकद्व्याकृतीत्यादि । आकृतिराकारः, एकश्चासौ आकारश्च तद्योगेन द्वौ आकारौ ताभ्यां योगेन चात्र आकारा इत्युपायानां स्वातन्त्र्य[म]ङ्गत्वं च विवक्ष्यते ।

अत्रेदमवधातव्यम्—कर्मण ऐश्वर्यफलं प्रति स्वातन्त्र्यं पारतन्त्र्यं च फलं[6] च

---

1. Perhaps it is a scrib's mistake it should read–व्रज्या शरणागतिः प्रपत्तिश्च
2. Perhaps scrib's mistake the word is Superflwous.
3. It should read सद्वारकाद्वारकान्
4. The word must be omitted it is a scrib's mistake.
5. Omit रु
6. Omit the two words फलं च scrib's mistake.

फलान्तरसाधिकाया भक्तेः कर्माङ्गत्वात् । ज्ञा(नं)[नस्य] कैवल्यं प्रति स्वातन्त्र्यं पारतन्त्र्यं च फलान्तरसाधिकाया भक्तेः ज्ञानाङ्गत्वात् । कर्मज्ञानयोः फलान्तरं प्रति स्वातन्त्र्यं पारतन्त्र्यं च फलान्तरसाधिकायां भक्तौ तयोरङ्गत्वेनान्वयात् । मोक्षे पारतन्त्र्यमेव । मोक्षं प्रति भक्तेः स्वातन्त्र्यमेव फलान्तरेष्वपि स्वातन्त्र्यमेव । मोक्षविषये तस्याः उपायान्तरं प्रति अङ्गत्वाभावात् । प्रपत्तेस्तु मोक्षे स्वातन्त्र्यं पारतन्त्र्यं च भक्तेरङ्गत्वात्, फलान्तरेषु स्वातन्त्र्यमेव प्रपत्तेः निरपेक्षोपायत्वात् । कर्मादीनां [1]एकाकारयोगस्तु कर्मणः कैवल्ये अङ्गत्वमेव न स्वातन्त्र्यम् । ज्ञानयोगस्यैश्वर्ये अङ्गत्वमेव, न स्वातन्त्र्यम् । कर्मज्ञानयोः मोक्षे पारतन्त्र्यत्वेन[2] स्वातन्त्र्यम् । भक्तेस्तु मोक्षे फलान्तरेषु च स्वातन्त्र्यमेव न पारतन्त्र्यम् । द्व्याकृतियोगस्तु—कर्मणः ऐश्वर्यफलं प्रति स्वातन्त्र्यं पारतन्त्र्यञ्च । ज्ञानयोगस्य कैवल्ये तु स्वातन्त्र्यं पारतन्त्र्यं च । भक्तेस्तु मोक्षे स्वातन्त्र्यं पारतन्त्र्यं च । प्रपत्तेस्तु स्वातन्त्र्यं पारतन्त्र्यं च । इत्येवमेकाकारयोगेन द्व्याकृति]योगेन च सम्भृतः सम्पादितः [3]पृथग्भाव एवानुभावो येषां तान्, एकाकृतियोगेन कर्मज्ञानभक्तीनां पृथग्भावः, द्व्याकृतियोगेन प्रपत्तेः पृथग्भावः । इमान् सन्मार्गान् सम्यक् प्रेक्ष्य कर्मज्ञानयोः मोक्षे व्यवहितोपायत्वं, भक्तेरव्यवहितोपायत्वेऽपि[4] दौष्कर्यादिदोषदुष्टत्वं, प्रपत्तेस्तु मोक्षे साक्षादुपायत्वं सकृदनुष्ठेयत्व[5]ममोघत्वं शीघ्रफल[6]प्रदत्वं चेत्यादिकं प्रमाणोपपत्तिभ्यां निश्चित्य शरण्य उपायः सारथिः [7]श्रीकृष्णः तस्य गिरो गीतावचनानि तेषामन्तश्चरमश्लोकः, [8]अत्र गीश्शब्देन तत्तद्वचनप्रति-

---

1. Since the Ms. does not mention about कर्म the following is added.
2. It must read -न्त्र्यमेव न स्वा-
3. पृथग्भावो भेदो यस्य स एवानुभवो महिमा येषां ते तथोक्ताः तानिमान् कर्मयोगादीन् चतुरः उपायान् भगवद्गीतोक्तान् सम्यक् विचार्य कर्मज्ञानयोः ।
4. अपि omitted
5. -यत्वं मोघत्वं
6. प्रद omitted
7. श्री omitted
8. तत्र हि शब्देन

पादिता उपाया लक्ष्यन्ते । ते च कर्मयोगादयस्तेषामन्तः अन्तिम उपायश्शरण-व्रज्या तत्रैव रमन्ते नान्यत्र[1] ।

[2]व्याख्यान्तरे—ननु कर्मज्ञानयोरुपायत्वं प्रपत्तेरङ्गत्वं पौराणिकैरुच्यते, तत्कथं भक्तिप्रपत्त्योरेव उपायत्वं निश्चीयत इत्याशङ्क्य पुराणोक्तीनां अन्यथासिद्धत्वं दर्शयति-कर्मेति । सम्यक् प्रेक्ष्य कर्मज्ञानयोरुपायत्वप्रतिपादकानां पुराणवाक्या-नामङ्गत्वे तात्पर्यम् . भक्तेश्शक्ताधिकारत्वं प्रपत्तेरङ्गाङ्गित्वविशिष्टत्वं निश्चित्ये-त्यर्थः ॥ २२ ॥

## ॥ प्रपत्तियोग्याधिकारो दशमः ॥

अथ प्रपत्त्यधिकारपद्ययोराद्येन[पद्येन]सामान्येनाधिकारस्वरूपं, तस्याधिकारस्य भक्तिप्रपत्त्योर[3]व्यपेक्षितत्वं प्रपत्तेस्सर्वाधिकारत्वं[4] प्रतिपादयति[5]—

**अर्थित्वेन समर्थतात्रिकतनुस्सम्पिण्डिताऽधिक्रिया**
**सा चाष्टाङ्गषडङ्गयोगनियतावस्था व्यवस्थापिता ।**
**श्रौती सर्वशरण्यता भगवतस्स्मृत्याऽपि सत्यापिता**
**सत्यादिष्विव नैगमेष्वधिकृतिस्सर्वास्पदे सत्पथे ॥ २३ ॥**

[6]समर्थतात्रिकं त्रिरूपं समर्थत्वं अर्थित्वेन, फलकामनया सम्पिण्डितं मिलितं, सदधिकारशब्दवा[च्यं][7] भवति । सामर्थ्यस्य त्रिरूपत्वं तु शास्त्र-

---

1. -न्यत्र कर्मत्यादाविति ? । अथ प्रपत्त्य- ॥ 20 ॥
2. omitted
3. व्यवस्थितत्वं
4. -त्वं च
5. -यति-अर्थित्वेनेति ।
6. तृकतनुः समर्थता त्रिरूपं सामर्थ्यं अर्थि-
7. वाच्या भ-

विहितस्य कर्मण: [1]यथावज्ज्ञानं, यथाज्ञानमनुष्ठानं [2]सा चाधिक्रियाऽधिकार: अष्टाङ्गयोगे भक्तियोगे षडङ्गयोगे न्यासे च नियते[3] भिन्ने अवस्थे यस्यास्सा [4]व्यवस्थापिता शास्त्रज्ञैर्नियमिता । [5]श्रौती-श्रुत्युक्ता भगवत: सर्वशरण्यता[6] स्मृत्याऽपि सत्यापिता, "सर्वलोकशरण्याय" "देवानां दानवानां च" "चरणौ शरणं तव" "अहमस्म्यपराधानां" "अकिञ्चनोऽनन्यगतिश्शरण्य" इत्यादिभिश्शपथपूर्वकं प्रतिपादिता[7] । वैदिकस्य प्रपदनस्य कथं सर्वाधिकारत्वमित्याशङ्क्य तत्र दृष्टान्तमाह—सत्यादिष्विति[8] । नैगमेषु, सत्यं वद, धर्मं [9]चरेत्यादि निगमविहितेषु, सत्यादिष्विव । आदिशब्देन षट्कनिर्माणादिसङ्ग्रह: । सर्वास्पदे सकलान्वययोग्ये सत्पथे सुकरोपायतया सन्मार्ग अधिकृति: सर्वाधिकार: उपपद्यत इति शेष: ।

व्याख्यान्तरे—अर्थित्वे सम........[10]अर्थित्वेन विलम्बसहिष्णुत्वेन च सह समर्थतात्रिकतनु: । समर्थतात्रिकमित्यनेन सामर्थ्यं वैदुष्यं अपर्युदासश्च विवक्षित: । अर्थित्वेन सह समर्थतात्रिकतनु: अधिकारो यस्या भक्ते: सा तथोक्ता । आहु-

---

1. यावज्ज्ञानं
2. अनुष्ठानशक्तिश्च शास्त्रानुमतगुणादि 'योग्यता चेत् सा-
3. नियतावद्धा प्रतिनियते
4. -स्थापि शास्त्रस्थैरपि नि-
5. किञ्च
6. "मुमुक्षुर्वै शरणमहं प्रपद्ये" इत्युक्ता श्रुतौ मुमुक्षुत्वस्य अधिकारत्वेन प्रदर्शनात् मुमुक्षावन्तस्सर्वेऽपि अधिकारिण: इति भगवत: सर्वशरण्यतोक्ता सा स्मृत्या
7. अर्थवेदसत्यानां
8. -दिष्विवेति ।
9. चरेत्यादिभि: इति भाव: । सत्यधर्मादिषु यथा सर्वाधिकारत्वं तथा सर्वास्पदे सत्पथे अधिकृति: सर्वाधिकार: सत्पथ: प्रपदनं, अकिञ्चनानां सतां पन्था: प्रपदनं "कर्म ज्ञानं उपासनञ्चे"त्यत्र तथा प्रतिपादनात् । तत्र अधिकारोऽपि सर्वाधिकार: सर्वास्पदशब्देनापि सूच्यते ।
10. अर्थित्वेन to शेष: ॥ 22 ॥ taken from D. No. 5345. ms.

रभियुक्ताश्च । "अर्थी समर्थो विद्वान् शास्त्रेणापर्युदस्त" इति । सम्पिण्डिता मिलिता अधिक्रिया अधिकारो यस्यास्तथोक्ता ज्ञानशक्त्यादीनाञ्चतुर्णां मेलने सत्येव भक्तावधिकार: न त्वेकैकयोगेनेति भाव: । सा भक्ति: अष्टाङ्गैष्षडङ्गैर्वा योगेन नियता त्रैवर्णिकमात्रनियता अवस्था यस्यास्तथोक्ता । व्यवस्थापिता श्रुत्यादिभिरिति शेष: । भगवतश्शरण्यता वर्णाश्रमानादरेण सकलप्रपत्तव्यता श्रौती । "मुमुक्षुर्वै शरणमहं प्रपद्ये" इत्यादि श्रुतिसिद्धा । स्मृत्यापि—"न जातिभेदं न कुलं न लिङ्गं न गुणक्रिया । सर्वे एव प्रपद्येरन् सर्वधातारमच्युतम् ॥" इत्यादि-स्मृतिभिश्च सत्यापिता परमार्थीकृता । ननु श्रुति ........ [विहिते] कथं त्रैवर्णिकानामधिकार इत्याशङ्क्य दृष्टान्तप्रदर्शनेनापाकरोति—नैगमेषु "सत्यं वदे" त्यादिनिगमविहितेषु सत्यादिष्विव । आदिशब्देन तटाकनिर्माणादि-सङ्ग्रह: । सर्वास्पदे सकलान्वययोग्ये सत्पथे सुकरोपायतया सन्मार्गे प्रपत्तौ अधिकृति: स्त्रीशूद्राणामधिकार: उपपद्यत इति शेष: ॥ २३ ॥

[1]अथ प्रपत्तियोग्याधिकारान्तिमेन पद्येन सन्त: उपायान्तरज्ञानादीनां चतुर्णा-मधिकारांशानां अन्योन्यसम्मेलनेन पञ्चदशविधेषु प्रपत्त्यधिकारेषु एकाकारमाश्रयन्त: स्वतन्त्रप्रपदनविधिना मुक्तये श्रीशमाश्रयन्त इत्याह—भक्त्यादाविति ।

**भक्त्यादौ शक्त्यभाव: प्रमितिरहितता शास्त्रत: पर्युदास:**
**कालक्षेपाक्षमत्वं त्विति नियतिवशादापतद्भिश्चतुर्भि: ।**
**एकद्वित्र्यादियोगव्यतिभिदुरनिजाधिक्रियास्संश्रयन्ते**
**सन्त: श्रीशं स्वतन्त्रप्रपदनविधिना मुक्तये निर्विशङ्का: ॥ २४ ॥**

भक्त्यादौ उपायान्तरे शक्त्यभाव: अशक्ति: एक:, तत्र प्रमितिरहितता ज्ञानाभाव एक:, शास्त्रत: पर्युदास: निषेध एक:, फले विलम्बाक्षमत्वमेक: इत्येवं-प्रकारेण दैववशात् आगच्छद्भिरेतैर्हेतुभि: । एकद्वित्र्यादियोगेत्यादि । उक्तेषु

---

1. Omission reclaimed in Ms. text from अथ to निजभरवि-

चतुर्षु एकेन योगः, द्वाभ्यां योगः, त्रिभिः योगः, चतुर्भिर्योगश्च । एतैश्चतुर्विधैर्योगैः व्यतिभिदुरः परस्परं भिन्नोऽधिकारो येषां ते तथोक्ताः । तत्रैकैकेन योगेन चत्वारोऽधिकाराः, द्वाभ्यां योगे षडधिकाराः, त्रिभिर्योगे चत्वारः, चतुर्भिर्योगे त्वेकः, इत्याहृत्य पञ्चदशवि(धो)[धाः] अधिका(रो)[राः]भव(ति)[न्ति] । एवं पञ्चदशविधाधिकारेषु यथाधिकाराः यथाप्राप्तैकाधिकाराः सन्तो निर्विशङ्काः, स्वतन्त्रप्रपदनपक्षे पार्ष्णिग्राहोत्थशङ्कातङ्करहिताः मुक्तये श्रियःपतिं नारायणं स्वतन्त्र-प्रपदनविधिना भक्त्यङ्गत्वं विहाय प्रपत्तिमेव भगवद्वशीकारे स्वतन्त्रोपायत्वेन परिगृह्य स्वतन्त्रप्रपत्तिविधिना मार्गेण संश्रयन्ते शरणं गच्छन्तीत्यर्थः ॥ २४ ॥

## ॥ परिकरविभागाधिकार एकादशः ॥

अथ परिकरविभागाधिकारपद्ययोराद्येन भगवति भरन्यासरूपायाः प्रपत्तेः परिकरविशेषः श्रुत्यादिभिः दर्शित इत्याह—भूयानि[ति] ।

इयानित्थंभूतस्सकृदयमवश्यं भवनवान्  
दयादिव्याम्भोधौ जगदखिलमन्तर्यमयति ।  
भवध्वंसोद्युक्ते भगवति भरन्यासवपुषः  
प्रपत्तेरादिष्टः परिकरविशेषः श्रुतिमुखैः ॥ २५ ॥

दयाक्षीरसागरे दयया शरणागत्यापादके जगदखिलमन्तर्यमयति सर्वान्तर्यामिणि भरन्यासप्रेरके भवध्वंसोद्युक्ते भरन्यासं कारयितुमादौ कृतसङ्कल्पे एवम्भूते भगवति भरन्यासरूपायाः प्रपत्तेः परिकरविशेष [1]आनुकूल्यसङ्क(ल्पादि प्र)[ल्पःतत्प्र]-भृतिभिरियान् एतावान् पञ्च षड्वा, इत्थंभूतः एवंप्रकारः सकृदयमवश्यं भवनवान् प्रतिफलं सकृत्कर्तव्ये प्रपदने अयं परिकर अवश्यं भावितः सम्भावित इत्यादिष्टः ॥ २५ ॥

---

1. आदि Redundant and to be om itted.

अथ परिकरविभागाधिकारान्तिमेन[पद्येन] भगवच्छास्त्रे पञ्चाङ्गपूर्वकं प्रतिपादितोऽयमिति वदन् क्रमेण अङ्गानामङ्गिनश्च प्रयोजनानि कथयति—प्रख्यात इति ।

**प्रख्यातः पञ्चषाङ्गस्सकृदिति भगवच्छासनैरेष योग-**
**स्तत्र द्वाभ्यामपायाद्विरतिरनितरोपायतैकेन बोध्या ।**
**एकेन स्वान्तदार्ढ्यं निजभरविषयेऽन्येन तत्साध्यतेच्छा**
**तत्त्वज्ञानप्रयुक्ता त्विह सपरिकरे तादधीन्यादिबुद्धिः ॥ २६ ॥**

अयं योगः उपा(यं)[यः] भरन्यासरू(पं)[पः] भगवच्छासनैः श्रीपाञ्चरात्रशास्त्रैः पञ्चषाङ्गैः पञ्च वा षड् वा अङ्गानि यस्य, अहिर्बुध्न्यसंहितोक्तफलत्यागरूपाङ्गान्तरे सति षडङ्गत्वमस्य । इदमप्यङ्गं मोक्षप्रपत्तौ नीतम् । सकृदेव कर्तव्य इति प्रख्यातः । तत्राङ्गेषु द्वाभ्यामानुकूल्यसङ्कल्पप्रातिकूल्यवर्जनाभ्यामपायाद्विरतिः निषिद्धेभ्यो निवृत्तिः सिध्यति । "आनुकूल्येतराभ्यां तु विनिवृत्तिरपायत" इत्युक्तेः । एकेन कार्पण्येन अनितरोपायता प्रपत्त्युत्तरकालं अनन्योपायता च सिध्यति, न(?) बोध्या । "कार्पण्येनाप्युपायानां विनिवृत्तिरिहेरिते" त्युक्तेः । एकेन महाविश्वासेन निजभरविषये निजभरस्य विषयः स्वरक्षणं तत्र स्वान्तदार्ढ्यमुत्तरकाले मनसो दार्ढ्यं सिध्यति । अन्येन गोप्तृत्ववरणेन निजभरविषये तत्साध्यतेच्छा भगवतैवेदं साध्यमितीच्छा भवति । सपरिकरे साङ्गे [1]इह प्रपदने तादधीन्यादिबुद्धिः तदधीनत्वतदर्थत्वादिः[2] तत्त्वज्ञानप्रयुक्ता "स्वामी[3] स्वशेषं स्ववश" मित्युक्ताकारवेदान्तयाथात्म्यज्ञानसिद्धा भवति ॥ २६ ॥

## ॥ साङ्गप्रपदनाधिकारो द्वादशः ॥

साङ्गप्रपदनाधिकारपद्ययोराद्येन पद्येन प्रपदनस्वरूपं शोधयति[4]—

---

1. इहाङ्गिनि भरन्यासे तादधी-
2. -त्वादिधीः
3. स्वामिशेषं स्वभरमित्यु-
4. -ति-अभीष्ट इति ।

**अभीष्टे दुस्साधे स्वत इतरतो वा क्वचन त-**
**द्भरन्यासं याच्ञान्वितमभिवदन्ति प्रपदनम् ।**
**इतः पश्चाद्स्मद्यतननिरपेक्षेण भवता**
**समर्थ्योऽसावर्थस्त्विति मतिविशेषं तदविदुः ॥ २७ ॥**

अभीष्टे क्वचन वस्तुनि रक्षणरूपे, स्वतः स्वेन[1] इतरतः परैश्च दुस्साधे साधयितुमशक्ये सति[2] तस्य वस्तुनो भरन्यासं प्रपदनमभिवदन्ति । तद्विद इति शेषः । भरन्यासस्याभिप्रायं दर्शयति—इत इति । इतः पश्चात् समर्पणकालादुत्तरत्र अस्मत्प्रयत्ननिरपेक्षेण स्वीकृतभरेण भवतैव एतद्रक्षणं समर्थनीयमिति यो मतिविशेषः तमेव तत्प्रपदनमित्यविदुः[3] । व्याख्यान्तरे—स्वतः स्वेन इतरतः इतरात् ब्रह्म रुद्रादिभिर्वा अभीष्टे मोक्षे दुस्साधे सति क्वचन समर्थकारुणिके श्रियःपतौ याच्ञान्वितं त्वं मे गोपायिता भवेति प्रार्थनान्वितं तस्याभीष्टस्य यो भरः यत्नः तस्य न्यासं क्षेपं प्रपदनमभिवदन्ति । ननु निरवयवस्य यत्नस्य कथं निक्षेप इत्याशङ्कामुत्तरार्धेन परिहरति—इतः पश्चादिति । इतः पश्चात् प्रपत्त्यनन्तरं अस्मद्यतन-निरपेक्षेण भवता असावर्थः समर्थ्यस्साध्य इत्येतादृशं मतिविशेषं तत्प्रपदनं प्रपत्तेः पूर्वं अस्मद्व्यापारे सापेक्षोऽपि भगवान् प्रपत्त्यनन्तरमस्मद्व्यापारमनपेक्ष्य पुरुषार्थं साधयतीति बुद्धिविशेषस्यैव भरन्यासत्वान्न कश्चिद्विरोध इति भावः ॥ २७ ॥

अथान्तिमेन पद्येन[4] भगवति भरन्यासः यदर्थं कृतः तत्र निर्भरो भवेदित्याह[5]—

---

1. स्वेन च इत-
2. सति अनन्यसाध्ये स्वाभीष्ट इत्यर्थो दर्शितः । तद्भरन्यासं तस्य वस्तुनो रक्षाभरसमर्पणं कीदृशं प्रार्थनान्वितमिति वदन्ति तद्विदः
3. -विदुः विदांचक्रुः । दुस्साधे—अभीष्टे स्वत इतरतो वा स्वेन चाचार्येण वानुष्ठीयमानं भरन्यासम् ॥ 22 ॥ अथान्ति—
4. -द्येन स्वेन भरन्यासः
5. -ह-युग्येति ।

**युग्यस्यन्दनसारथिक्रमवति त्र्यन्तसन्दर्शिते**
**तत्त्वानां त्रितये यथार्हविविधव्यापारसन्तानिनि ।**
**हेतुत्वं त्रिषु कर्तृभाव उभयोः स्वाधीनतैकत्र तत्**
**स्वामिस्वीकृतयद्भरोऽयमलसस्तत्र स्वयं निर्भरः ॥ २८ ॥**

त्र्यन्तसन्दर्शिते "आत्मानं रथिनं विद्धि शरीरं रथमेव च" "मां तत्र सारथिं विद्धि" इत्यादिभिः प्रकाशिते । केन प्रकारेण युग्यस्यन्दनसारथिक्रमवति युग्यो रथ्यः अश्वः, स्यन्दनं रथः, सारथिः रथप्रवर्तकः तन्न्यायवति[1], तद्वत्स्थित इत्यर्थः । यथार्हविविधव्यापारसन्तानिनि[2], यथार्हं यथोचितं, विविधानां[3] व्यापाराणां सन्तानं[4] परम्परा यस्य तस्मिन्[5] तादृशे[6], तत्त्वानां त्रितये तत्त्वत्रयमध्ये हेतुत्वं किञ्चित्कार्यं प्रति हेतुत्वं, त्रिष्वपि समानं रथगमने [7]रथाश्वसारथिष्विव शरीरात्मेश्वरेषु[8] समानं, कर्तृभावः पुरुषव्यापाररूपः उभयोरश्व[9]सारथ्योरिव आत्मेश्वरयोः । स्वातन्त्र्यन्तु एकत्र सारथाविव ईश्वर एव । तत्तस्मात्, अयमलसः प्रपन्नः स्वभरस्य स्वयं निर्वाहाशक्त्याऽलसत्वं स्वामिस्वीकृतयद्भरः स्वामिनेश्वरेण स्वीकृतो यस्य रक्ष्यस्य भरः यस्य स भवति । स्वे समर्पितं यस्य भरं स्वीकृतवानीश्वरः तत्र विषये स्वयं निर्भरो भवेत् तदर्थं किमपि न कुर्यादिति भावः ॥ २८ ॥

## ॥ कृतकृत्याधिकारस्त्रयोदशः ॥

अथ कृतकृत्याधिकारपद्ययोराद्येन ईश्वरेण यद्भरः स्वीकृतः तत्र स्वस्य कर्तव्यशेषाभावात् भरस्वीकर्तरि कैङ्कर्यकरणं उत्तरकृत्यमाह— समर्थ इति ।

---

1. -यवत् ।
2. -पार...सन्दर्शिनि
3. -धानि व्या—
4. -न्तानानि
5. तस्मिन् स्वोचितविविधव्यापारवतीत्यर्थः ।
6. Omitted
7. रथस्य वाऽस्य सारथेश्चैव-शरीरा०
8. -षु हेतुत्वं समं ।
9. Taken from R. No. 8765 Ms. सारथ्योरिव to ज्ञानं

समर्थे सर्वज्ञे सहजसुहृदि स्वीकृतभरे
यदर्थं कर्तव्यं न पुनरिह यत्किञ्चिदपि नः ।
नियच्छन्तस्तस्मिन्नि[1](रुपधि)[रवधि]महानन्दजलधौ
कृतार्थीकुर्मस्स्वं कृपणमपि कैङ्कर्यधनिनः ॥ २९ ॥

समर्थे सर्वशक्तौ, सर्वज्ञे सहजसुहृदि स्वतस्सुहृदि इमानि हेतुगर्भ-विशेषणानि समर्थत्वात् सर्वज्ञत्वात् सर्वसुहृत्त्वादित्यर्थः । यदर्थं स्वीकृतभरे सति तस्मिन् रक्षणे विषये नः अस्माकं पुनः किञ्चिदपि कर्तव्यान्तरं नास्ति तर्हि तूष्णीं किं स्थातव्यमित्यत आह—नियच्छन्त इति । तस्मिन् निरवधिमहानन्दजलधौ निरवधिकस्य महानन्दस्य जलधौ अवाप्तसमस्तकामतया परिपूर्णे भगवति नियच्छन्तः नियमं कुर्वन्तः अत्रैव कैङ्कर्यं कुर्मो नान्यत्रेति कैङ्कर्यधनिनः कैङ्कर्याख्यमहाधनवन्तो भूत्वा स्वमात्मानं कृतार्थीकुर्मः । एवं कृतार्थीकरणं प्रपन्नस्य कार्यमिति भावः ॥ ॥ २९ ॥

अथ कृतकृत्याधिकारान्तिमेन पद्येनास्याधिकारिणो मोक्षार्थं भरन्यासस्य कृतत्वात् ऐहिकामुष्मिकफलानामस्य त्याज्यकोटिनिविष्टत्वात् देहयात्रायाः पूर्वकर्माधीनत्वाच्च आज्ञाकैङ्कर्यमेव करणीयमित्याह—भगवतीति ।

भवति हरौ पारं गन्तुं भरन्यसनं कृतं
परिमितसुखप्राप्त्यै कृत्यं प्रहीणमकृत्यवत् ।
भवति च वपुर्वृत्तिः पूर्वं कृतैर्नियतक्रमा
परमिह विभोराज्ञासेतुर्बुधैरनुपाल्यते ॥ ३० ॥

पारं अपारसंसारतीरभूतं मोक्षं गन्तुं भगवत्प्राप्त्यर्थमित्यर्थः । भगवति तदुपयुक्तगुणवति हरौ भरन्यासः कृतः मोक्षार्थमस्य कर्तव्यांशो नास्तीत्यर्थः । परिमितसुखप्राप्त्यै परिमितसुखानि ऐहिकामुष्मिकसुखानि तत्प्राप्त्यै कृत्यं कर्तव्यं

1. -रुपधि-in R. S.

कर्म अकृत्यवत् पापवत् , त्यक्तं तेषां बन्धकत्वादिति भावः । वपुर्वृत्तिः देहयात्रा च पूर्वैं कृतैः कर्मभिः नियतक्रमा प्रारब्धकर्मनियतक्रमा कर्मक्रममनुसृत्येत्यर्थः । तत् तस्मात् परं कैवल्यं प्रपत्तेः परं वा इह जगति कृतकृत्यावस्थायां वा बुधैः कृतिभिः, विभोः शेषिणो भगवतः, आज्ञासेतुः आज्ञा कैङ्कर्यरूपमर्यादा कैङ्कर्यरूपमर्यादा अनुपाल्यते अनुसृत्यते ॥ ३० ॥

## ॥ स्वनिष्ठाभिज्ञानाधिकारश्चतुर्दशः ॥

अथ स्वनिष्ठाभिज्ञानपद्ययोराद्येन पद्येन स्वस्मिन्नपवर्गगुणदर्शनाल्लिङ्गात् स्वरूपोपायार्थेषु स्वनिष्ठाभिज्ञानं सुबोधं भवति, येन एतज्ज्ञानमहिम्नाऽयं विनीतस्सन् छिद्रनिवहान् स्तम्भयितुं शक्नोतीत्याह— स्वरूपेति ।

**स्वरूपोपायार्थेष्ववितथनिविष्टस्थिरमतेः**
**स्वनिष्ठाभिज्ञानं सुभगमपवर्गादुपनतात् ।**
**प्रथिम्ना यस्यादौ प्रभवति विनीतस्स्थगयितुं**
**गभीरान् दुष्पूरान् गगनमहतश्छिद्रनिवहान् ॥ ३१ ॥**

स्वरूप[ोपायार्थेषु]देहादिविलक्षणत्वभगवदनन्यार्हशेषत्वादिविशिष्टे स्वरूपे [उपाये]भगवत्यर्थे अपरिच्छेद्यपुरुषार्थभूते कैङ्कर्ये च अवितथनिविष्टस्थिरमतेः अवितथा यथार्था निविष्टा प्रविष्टा स्थिरा मतिः ज्ञानं यस्य तस्य, कृतकृत्याधिकारिणः, तेषु स्वरूपोपायार्थेषु स्वस्य निष्ठा अस्तीत्यभिज्ञानं उपनतात् अपवर्गात् सुगमं भवति । अपवर्गेणात्र अपवर्गचिह्नभूताः परपरिभवादिषु विषादाभा[ व ]व्याप्यात्मगुणा लक्ष्यन्ते । अपवर्ग उपनीतिचिह्नगुणदर्शनात् लिङ्गात् सुखेन ज्ञातुं शक्यते । तथाहि-[यदा]परपरिभवादिषु जातेषु इमे देहविषयाः आत्मा देहादिविलक्षण इति ज्ञात्वा विषादाभावः सुतरामनुकम्पेत नरका(र्चिषमदिन्धन)[र्चिष्मदिन्धन]मित्युक्तप्रकारेण परिभा(वु)[व]केषु कृपादयो गुणा दृश्यन्ते । तदा स्वरूपे स्वस्य निष्ठाऽस्तीति ज्ञातुं शक्यते । य(था)[दा] भगवद्व्यतिरिक्तेषु रक्षकत्वबुद्धिनिवृत्तिः भयहेतुषु दृष्टेषु भयाद्यभावेन प्रीतिरित्यादयो गुणा दृश्यन्ते । तदास्योपाये निष्ठा-

ऽस्तीति ज्ञायते। यदा देहयात्राद्युपेक्षापेक्षायाञ्च जातायामपि "नादत्तमुपतिष्ठत" इति न्याया(दिव परे)[दीश्वरे]च्छां विना न सिध्यतीति निश्चित्य "न सुखं प्राप्य संहृष्येत् दुःखं प्राप्य न स(ञ्च)[ञ्ज्व]रेत्" इत्युक्तप्रकारेण प्राकृतवस्तुलाभालाभयोः हर्षशोकराहित्यं भगवत्कैङ्कर्यादिव संजादयो गुणा दृश्यन्ते। तदा स्वस्य निष्ठास्तीति ज्ञानं [1]जायते। एवं स्वनिष्ठाभिज्ञानं उपनतादपवर्गादपि सु(भगं)[गमं]भवति। एतद्देहावसानं प्राप्य मोक्षसुखादपि [2]अतिशयितसुखरूपमस्य भवति। एवमुक्तैर्लिङ्गैः स्वरूपादिषु[3] स्वनिष्ठाभिज्ञानवतः पुंस एव तन्माहात्म्यात् "नैषा पश्यति राक्षस्यो नेमान् पुष्पफलद्रुमान्। एकस्थहृदया नूनं राममेवानुपश्यति॥" इत्युक्तरीत्या भयहेतुषु पापेषु कैङ्कर्यव्यतिरिक्तप्रीतिहेतुषु लौकिकव्यापारेषु चास्येन्द्रियस्य व्यापारो न सम्भवतीत्यभिप्रायेणाह—प्रथिम्नेति। यस्य स्वनिष्ठाभिज्ञानस्य प्रथिमा[4] भवेन[5] गभीरान्[6] अतिनिम्नानत एव दुष्पूरान् गगनमहतः आकाशादपि महतो विपुलान् अतिशयप्रमाणानित्यर्थः। छिद्रनिवहान् कैङ्कर्य[7]रूपव्यतिरिक्तसुखदुःखहेतुभूतव्यापा[8]राः छिद्राणि तेषां निवहान्। आदौ उत्पत्तिकाल एव [9]स्थगयितुमाच्छादयितुं शक्नोति। दुरितनिवहान्नोत्पादयतीत्यर्थः। स्वरूपादिनि-[10]ष्ठावान् आज्ञानुज्ञाकैङ्कर्यव्यतिरिक्तं साध्वसाधु किमपि[11] कर्म न करोति[इति]भावः।

---

1. up to ज्ञानं taken from R. No. 8765 ms.
2. अतिष्वतिश-
3. -पादिष्टस्वनिष्ठा-
4. प्रथिम्ना
5. वैभवे
6. विनीता शक्त्यादिगुणयुक्तोऽयं गम्भीरान् अतिनिम्नान् अत एव दुष्पूरान् दुःस्थानान् गगन-
7. -र्यकरणव्यति-
8. -रान् हेलाकृत्यकरणादयो लौकिकव्यापाराश्च छिद्राणि
9. स्थगितुं
10. -निष्ठाभिज्ञानाज्ञाकैङ्कर्यव्यति-
11. -मपि किमपि करोतीति भावः।

व्याख्यान्तरे-स्वरूपं भगवच्छेषत्वं उपायो भगवति विषये कृता प्रपत्तिः, अर्थः भगवत्कैङ्कर्यरूपपुरुषार्थः । अन्यशेषत्वेन स्वानुसन्धानाभावेन स्वरूपे उपायान्तराप्रवेशेन प्रपत्तौ प्रयोजनान्तरप्रावण्याभावेन पुरुषार्थे अवितथनिविष्टस्थिरमतेः प्रपन्नस्य स्वनिष्ठाभिज्ञानं स्वस्य निष्ठा गुणानुभवकैङ्कर्यादिरूपा वृत्तिः सेवाभिज्ञानं प्रपन्नचिह्नं उपनतात् हस्तगतात् अपवर्गात् मोक्षात्, सुभगं मनोहरं, कुत इत्याशङ्क्य हेतुमाह—आदौ समाश्रयणकाले विनीतः गुरुणा शिक्षितः प्रपन्नः यस्य स्वनिष्ठाभिज्ञानस्य प्रथिम्ना वैभवेन गभीरानगाधानत एव दुष्पूरान् तेनापि पूरयितुमशक्यान् गगनमहतः आकाशवद्विस्तृतान् छिद्राणां पुत्रेषणादीनां निवहान् स्थगयितुं निराकर्तुं प्रभवति समर्थो भवति ॥ ३१ ॥

[1]अथान्तिमेन पद्येन प्रपत्तेः पश्चादाशरीरपातं विधिना स्थाप्य[2]मानाः स्वामि[3]दत्तां स्वनिष्ठां शिरसि शेषपटं कृत्वा शेषमायुर्नयन्तीत्या[4]ह—

स्वापोद्बोधव्यतिकरनिभे भोगमोक्षान्तराले
  कालं कञ्चिज्जगति विधिना केनचित् स्थाप्यमानाः ।
तत्त्वोपायप्रभृतिविषये स्वामिदत्तां स्वनिष्ठां
  शेषां कृत्वा शिरसि कृतिनः शेषमायुर्नयन्ति ॥ ३२ ॥

स्वापो-निद्रा, उद्बोधः-जागरः तयोः व्यतिकरः सम्मेलनं तत्सदृशे ज्ञानाज्ञानशबलित इत्यर्थः । भोगः संसारः, मोक्षः विश्लेषः तयोर्मध्ये, प्रपत्तेः परं इह जगति केनचिद्विधिना प्रारब्धविशेषेण [5]कञ्चित्कालं स्थाप्यमानाः कृतिनः कृतकृत्याः तत्त्वोपायप्रभृतिविषये स्वरूपोपायपुरुषार्थेषु स्वामिना भगवता दत्तां प्रसादतो वितीर्णां

---

1. अथ स्वनिष्ठाधिकारान्तिमेन
2. -मानो यः स्वा-
3. -दत्तस्वनिष्ठाभिज्ञानवान् आज्ञादिकैङ्कर्यपरः शेषमा-
4. -ह-स्वापेति ।
5. किञ्चित्

स्वनिष्ठां पूर्वश्लोकोक्तां स्वस्य दृढां स्थितिं शिरसि शेष[1]ततीं कृत्वा [2]शेषमायुर्यापयन्ति ।

व्याख्यान्तरे—अनया निष्ठया कालो नेतव्य इत्याह—स्वापोद्बोधयोः निद्राजागरणयोः व्यतिकरः सम्पर्कः तत्तुल्ये शेषत्वज्ञानोदयात् केवलस्वापतुल्यताऽपि नास्ति । अतस्तदुभयसम्पर्कतुल्यता । भोगः वर्तमानसुखदुःखानुभवः । मोक्षो भाविपुरुषार्थः । तयोरन्तराले मध्यकाले अभ्युपगतव्यतिरिक्तानां सर्वेषां कर्मणां विनाशात् केवलं भोगोऽपि न, प्रकृतिसम्बन्धानुवर्तनात् मोक्षोऽपि न, अतस्तदन्तरालत्वम् । जगति अस्मिन् लोके केनचित् विधिना दृष्टत्वसाधकेन केनचिददृष्टेन कञ्चित्कालं शरीरावसानपर्यन्तकालं स्थाप्यमानाः प्रपन्नाः तत्त्वोपायप्रभृतिविषये, प्रभृतिशब्देन पुरुषार्थ उच्यते । स्वामिना कृतकृत्यानामपि कर्तव्यतयावशिष्टां स्वस्य निष्ठामध्यवसायं शिरसि कृत्वा कृतिनः विवेकिनः शेषमायुर्नयन्ति कालक्षेपं कुर्वन्ति ॥ ३२ ॥

## ॥ उत्तरकृत्याधिकारः पञ्चदशः ॥

उत्तरकृत्याधिकारपद्ययोराद्येन [3]पद्येन उत्तरकृत्यं सङ्ग्रहेण [4]दर्शयति—

**सन्तोषार्थं विमृशति मुहुस्सद्भिरध्यात्मविद्यां**
**नित्यं ब्रूते निशमयति च स्वादुसुव्याहृतानि ।**
**अङ्गीकुर्वन्ननघललितां वृत्तिमादेहपातात्**
**दृष्टादृष्टस्वभरविगमे दत्तदृष्टिः प्रपन्नः ॥ ३३ ॥**

---

1. शेषापटीं
2. शेषां स्वाम्युपभुक्तवासस्रागादि तदिव बिभ्राणं शेष-
3. पद्येन moitted
4. -ति-सन्तोषार्थमिति ।

दृष्टादृष्टस्वभरविगमे दृष्टविषये अदृष्टविषये च रक्षणे स्वस्य यो [1]भरः तस्य विगमे अपगमे दत्तदृष्टिः सावधानस्सन् [2]दृ(ष्टेऽन्य)[ष्टस्य]कर्माधीनत्वाददृष्टस्य भगवत्यर्पितत्वादिति भावः । अयं प्रपन्नः आदेहपातात् देहपातपर्यन्तं अव्ययीभावसमासः । [3]वृत्तिं शेषवृत्तिं आज्ञारूपामङ्गीकुर्वन् मनःप्रीत्यर्थं मध्ये मध्ये सद्भिस्सह अध्यात्मविद्यां वेदान्तादिशास्त्रं मुहुर्विमृशति चिन्तयति । तथा सन्तोषार्थं स्वादूनि सुव्याहृतानि भगवद्भागवतविषयाणि सद्भिः प्रणीतानि [4]स्तोत्रादीनि नित्यं परेभ्यः ब्रूते कथयति, परेभ्यश्च स्वयं शृणोति इत्युत्तरकृत्यसङ्ग्रहः ।

व्याख्यान्तरे—प्रपन्नः सद्भिस्सह परमैकान्तिभिस्सह, अध्यात्मविद्यां जीवपरमात्मयाथार्थ्यप्रतिपादकविद्यां, सन्तोषार्थं जीवात्मपरमात्मस्वरूपानुसन्धानार्थं मुहुर्विमृशति । व्याहृतानि परहिंसोपयोगेन श्येनयागादिप्रतिपादनानि । सुव्याहृतानि ज्योतिष्टोमादिप्रतिपादकानि । स्वादुसुव्याहृतानि मोक्षप्रतिपादकानि । तान्येव शिष्येभ्यो नित्यं ब्रूते । स्वयमाचार्येभ्यो निशमयति । अनघां उपायापायरहितां, ललितां पुरुषार्थवद्भोग्यां, वृत्तिं आदेहपातात् देहपातपर्यन्तं अङ्गीकुर्वन् आचरन् दृष्टं देहयात्रा अदृष्टमात्मयात्रा उभयोर्विषये यस्तस्य भरः यत्नस्तस्य विगमे परित्यागे दत्तदृष्टिर्भवतीति शेषः ॥ ३३ ॥

[5]उत्तरकृत्याधिकारान्तिमेन पद्येन देशान्तरादागतं भर्तारं सतीव मूलमन्त्रे[6] आचार्योपदेशतो दृष्टं भगवन्तं कृतकृत्याः भक्तिपूर्वैर्[7]पराधैस्सहा[8]चरणैरनुभवतीत्याह[9]—

---

1. भरो भार
2. दृष्टस्य कर्माधी-
3. अनघत्वेन ललितां निरपायतया मनोहरां वृत्तिं शेष—
4. -तानि वचनानि स्तोत्रा-
5. अथ उत्तर-
6. -न्त्रे च
7. -वैर्निरपरा-
8. सदाचार्यः
9. -ह-प्रणयिनमिति ।

प्रणयिनमिव प्राप्तं पश्चात्प्रियास्स्वसमन्वितं
महति मुहुरामृष्टे दृष्ट्वा मनौ मणिदर्पणे ।
प्रपदनधनास्सन्तश्शुद्धैः प्रभुं परिभुञ्जते
प्रसृमरमहामोदस्मेरप्रसूनसमैः क्रमैः ॥ ३४ ॥

मुहुरामृष्टे मुहुर्विचिन्तिते, अन्यत्र मुहुर्नि[1]र्घर्षिते [2]महति मनौ मणिदर्पणे मूलमन्त्राख्यरत्नदर्पणे[3] परमशेषिणं आचार्योपदेशतः ज्ञात्वा प्रपदनधनाः सन्तः शुद्धैः निरपराधैः[4] सर्वतः प्रसर्पन् [5]महामोदो येषां तानि स्मेराणि विकसितानि यानि मल्लिकाप्रसूनानि तत्सदृशैः क्रमैः सदाचरणैस्तं प्रभुं परिभुञ्जते नित्यमनुभवन्ति किमिव, पश्चात्प्राप्तं देशान्तरं गत्वा पश्चादागतं, स्वसमन्वितं स्वेन सहैव वर्तमानं वल्लभं (प्रियं) [प्रिया इव] "सतीव प्रियभर्तारं जननीव स्तनन्धयम् । आचार्यं शिष्यवन्मित्रं मित्रवल्लालयेद्धरिम्" ॥ इत्यादिदृष्टान्तानामुपलक्षणमिदम् ।

व्याख्यान्तरे—पश्चात्प्राप्तं प्राधान्येन शेषत्वैकस्वरूपे ज्ञाते सति तत्प्रतिसम्बन्धिशेषितया पश्चा[त् ज्ञा-]तमित्यर्थः । प्रभुं श्रियःपतिं दृष्ट्वा प्रपदनधनाः पुरुषार्थसम्पादिनीं प्रपत्तिमुपलभ्य तन्निष्ठामेव परिपालयन्तीति ध्वनिः । सन्तः मुमुक्षवः, शुद्धैः उपायापायगन्धरहितैः प्रसृमरः महामोदः लोकातिशायि सौरभ्यं येषां तानि स्मेरप्रसूनानि तत्समैः तद्वद्भोग्यतमैः गुणानुभवकैङ्कर्यरूपैः क्रमैः परिभुञ्जते अनुभवन्ति । यथा नायिका दर्पणे आत्मानं प्रियं च युगपदवलोक्य पश्चाद्भोग्यभोगोपकरणैः कुसुमादिभिः प्रियमनुभवति । तथा प्रपन्नाः मूलमन्त्र आत्मानं शेषिणं चानुसन्धाय तद्गुणानुभवकैङ्कर्यादिकं अनुभवन्तीति भावः ॥३४॥

---

1. -र्निर्घर्षि-
2. महति सर्वार्थसंक्षेपात् माहात्म्याच्च मणौ दर्पणे
3. -दर्पणे महतां वस्तूनां सूक्ष्मतया दर्शनात् दर्पणरूपे तस्मिन् परम-
4. -राधैः प्रसृमरेति । सर्वतः प्रस(प)[र्प]न्
5. महान् आमोदो

## ॥ पुरुषार्थकाष्ठाधिकारः षोडशः ॥

अथ पुरुषार्थकाष्ठाधिकारपद्ययोराद्येन पद्येन भगवन्नियमनविशेषेण [1]स्वस्व-[2]भागवतशेषत्वसिद्धेः इत्थमाचार्यैश्शिक्षितानां प्रपन्नानामस्माकं कैङ्कर्यमपि भागवत-पर्यन्तसिद्धमभवदित्याह[3]—

स्वतन्त्रस्वामित्वात् स्वबहुमतिपात्रेषु नियतं
  श्रियःकान्तो देवस्स खलु विनियुङ्क्ते चिदचितौ ।
यथा लोकाम्नायं यतिपतिमुखैराहितधियां
  ततो नः कैङ्कर्यं तदभिमतपर्यन्तमभवत् ॥ ३५ ॥

श्रियःकान्तो[4] देवः स्वतन्त्रश्चासौ स्वामी च तत्त्वात्, स्वशेषभूतौ चिदचितौ स्वबहुमति[5]पात्रेषु "ज्ञा[नी] त्वात्मैव मे मत"मित्युक्तेषु भागवतेषु नियतं नियमेन विनियुङ्क्ते खलु विनियोजयति खलु[6] स्वकैङ्कर्यमपि परित्यज्य तत्कैङ्कर्ये विनियोजयतीत्यर्थः। खल्विति शत्रुघ्नादौ प्रसिद्धिं दर्शयति । ततः यति-पतिमुखैः शिक्षितबुद्धीनां नः यथालोकाम्नायं यथालोकं यथाम्नायं [7]जीवलोके स्वतन्त्रराजादयः स्वाभिमतेषु पुत्रमित्रकलत्रादिषु स्वशे[ष][8]भूतान्नियोजयन्ति । ते च तत्र तथैव परिचरन्ति । वेदे च—"यस्य देवे परा भक्तिः [यथादेवे तथा गुरौ]" "आचार्यदेवो भव" "ये के चास्मच्छ्रेयांसो ब्राह्मणाः तेषां त्वयासनेन प्रश्वसितव्यम्" । "मम मद्भक्तभक्तेषु प्रीतिरभ्यधिका भवेत्" "प्रभवो

---

1. स्वस्य
2. भगवतः शेषत्वे सिद्धे
3. -ह-स्वतन्त्रेति ।
4. -न्तः स देवः
5. -मानपा-
6. खलु to दर्शयति omitted
7. च insted of जीव
8. -भूता नियो-

भगवद्भक्ता मादृशां सततं द्विज" मद्भक्तजनवात्सल्य" मित्यादिषु भागवतशेषत्वकैङ्कर्य-स्योक्तत्वात्, कैङ्कर्यं किङ्करकृत्यं, तदभिमतपर्यन्तं तदभिमता भागवताः तत्पर्यन्त-मभवत्, भागवतकैङ्कर्येषु कृतेषु भगवत्कैङ्कर्यपरिपूर्तिर्भवेत्, अन्यथा विकलं स्यादिति भावः ॥ ३५ ॥

[1]पुरुषार्थकाष्ठाधिकारान्तिमेन पद्येन अस्य त्रिवर्गो न प्रार्थनीयः, [2]मोक्षोऽपि न प्रार्थनीयः किन्तु भागवतानां प्रसाद एव प्रार्थनीय[3](मि)[इ]ति इममर्थं स्वप्रार्थनामुखेन दर्शयति[4]——

**नाथे नस्तृणमन्यदन्यदपि वा तन्नाभिनालीकिनी-**
**नालीकस्पृहणीयसौरभमुचा वाचा न याचामहे ।**
**शुद्धानां तु लभेमहि स्थिरधियां शुद्धान्तसिद्धान्तिनां**
**मुक्तैश्वर्यदिनप्रभातसमयासत्तिं प्रसत्तिं मुहुः ॥ ३६ ॥**

नाथे भगवति विषये, नः अस्माकं, अन्यत् फलान्तरं, तृणं तृणप्रायं अतो न प्रार्थनीयम् । अस्य विरुद्धत्वात्,[5] अन्यदपि फलान्तरादन्यन्मोक्ष एव तमपि । [6]तस्य भगवतः नाभिः सैव नालीकिनी सरः, तस्मिन् विद्यमानं यन्नालीकं पुण्डरीकं, तेन स्पृहणीयं सौरभं मुञ्चतीति, तन्मुचा वाचा न याचामहे ।

---

1. अथ पुरु-
2. मोक्षो......नीयः omitted
3. -नीयः ।
4. -ति-नाथ इति ।
5. किञ्चित् अ(हि)[धि]कं अहिकं प्राकल्प्य तुष्टिमिच्छेत् । अन्यदपि मे फला-
6. तमपि । तस्मिन् वाचा न याचामहे । या अन्यदपि तृणादन्यत् महदपि वा भवतु इत्यर्थः । कीदृश्या तन्नाभीत्यादि । तस्य नाथस्य नाभिनालीकिनी नाभीपद्मसरः तत्र स्थितनालीकं नाभीपद्मं तद्वत् स्पृहणीयसौरभमुचा सर्वैः स्पृहणीयः यस्सौरभः तं मुञ्चतीति तथा । यद्वा नाभिनाली(को)[के] स्पृहणीयो यस्सौरभः स्वस्य तादृशसौरभा-भावः ततोऽप्यतिशयः यः [तादृश]सौरभवत्येत्यर्थः । अथवा नो नाथे

यद्वा नः नाथे अस्मत्स्वामिनि तृणं वा अन्यत्तूलं[1] वा अन्यत्तुष[2]भेदं न याचामहे तूलायाथ तृणाय वा न च तुष[3]भेदाय मन्यामह इत्यादिः[4] । यद्वा तृणमिति लघु क्षुद्रमैश्वर्यं विवक्ष्यते । [5]किञ्चिन्महत्कैवल्यं, अन्यदपि निरतिशया-[6]नन्दावहः मोक्षः तं न याचामहे । [7]तर्हि किं नः प्रार्थनीयमित्यत्राह–शुद्धानामिति । अपराधरुच्यादिभ्यो विरतानां स्थिरधियां [8]तद्विरत्यादिषु स्थिरबुद्धीनां शुद्धान्त-सिद्धान्तिनां,[9] प्रसत्तिं[10] प्रसादं कीदृशं[11] मुक्तानामैश्वर्यं कैङ्कर्यसाम्राज्यं तदेव दिनं तस्य प्रभातसमयासत्तिं[12] प्रातःकालासक्तिरूपां मुहुर्लभेमहि भूयः प्राप्नु(यां)[याम] । इदमेव भगवति कृतकृत्यस्य प्रार्थनीयमिति भावः ॥

व्याख्यान्तरे–नाथे अस्माकं अन्यत् ऐश्वर्यकैवल्यादिकं तृणं तृणवदुपेक्षणीयं अन्यदपि वा मोक्षमपि वा न याचामहे । किन्तु शुद्धानां चेतनोज्जीवनतत्पराणां स्थिरधियां स्थिरमनीषाणां अत एव शुद्धान्तसिद्धान्तिनां शुद्धान्तः अन्तःपुरं लक्ष्मी-रिति यावत् । तस्य सिद्धान्तो नियमः स एव पुरुषकारतया चेतनरक्षकत्वं स एषामस्तीति तादृशानां भागवतानां मुक्तैश्वर्यदिनप्रभातसमयासत्तिं मोक्षैश्वर्यप्राप्ति-

---

1. तृणफलं
2. -तुषछेदं वा न
3. -छेदाय
4. -दे:
5. ततः किञ्चि-
6. -शयमाह मोक्षः
7. -महे । वाचः तन्नाभिनालीकिनीति विशेषणेन एवंभूतया भागवतप्रार्थनमेव उचितमिति उच्यते । तर्हि किं वः प्रा-
8. -विरक्त्या-
9. भगवान्: शुद्धान्तः श्रीः तद्वत् सिद्धान्तः परमैकान्त्यं येषां भगवत्परमै-कान्तिनां इत्यर्थः
10. प्रसक्तिं
11. कीदृशीम् मुक्तैश्वर्येत्यादि ।
12. -सक्तिं

घनस्य यः प्रभातसमयः तस्य चासक्तिः प्रकारः यस्यास्तां, प्रसत्तिं प्रसादं अनुग्रहमिति यावत् । मुहुः प्रतिपदं लभेमहि प्राप्नुवाम ॥ ३६ ॥

## ॥ शास्त्रीयनियमनाधिकारः सप्तदशः ॥

अथ शास्त्रीयनियमनाधिकारपद्ययोराद्येन पद्येन प्रपन्नस्य शास्त्रं विना मुक्तवत्साक्षाद्वी[1]तद्धृदयत्वाभावात् परित्यागे बह्वनर्थसम्भवाच्च आमोक्षा[2]न्मुक्तवदुपायतां परित्यज्य शास्त्रीयसरण्यनुवर्तनं कर्तव्यमित्याह[3]—

मुकुन्दे निक्षिप्य स्वभरमनघो मुक्तवदसौ
स्वतन्त्राज्ञासिद्धां स्वयमविदितस्वामिहृदयः ।
परित्यागे सद्यस्स्वपरविविधानर्थजनना-
दलङ्घ्यामामोक्षादनुसरति शास्त्रीयसरणिम् ॥ ३७ ॥

मुकुन्दे स्वभरं निक्षिप्य स्थितोऽसौ प्रपन्नः शास्त्रं विना स्वयमविदितस्वामिहृदयः कैङ्कर्येषु शास्त्रं विना उपायरहित इति यावत् । शास्त्रीयसरणिपरित्यागे सद्यः स्वस्य परेषां[4] च स्वपुत्रशिष्यादीनामनेकेषां च नानाविधानर्थसम्भवात् पुत्रादयोऽप्येनं दृष्ट्वा शास्त्रीयसरणिं परित्यजन्ति, तदा तेषां[5] बह्वनर्थसम्भवः । मुक्तवदुपायतां परित्यज्य अनघः अपराधमकुर्वाण एव[6] आमोक्षात् देहमोक्षपर्यन्तं स्वतन्त्रस्याज्ञासिद्धां "श्रुतिस्मृती ममैवाज्ञा यस्तामुल्लङ्घ्य वर्तते । आज्ञाच्छेदी मम द्रोही

---

1. -द्विदितभगवद्धृदय-
2. -मोक्षं मु-
3. -ह-मुकुन्द इति ।
4. परेषां स्वपुत्र-
5. -षां अनर्थ-
6. एवं

मद्भक्तोऽपि न वैष्णवः" ॥ इत्यादिभिर्विहितामलङ्घ्यां ब्रह्मादिभिरपीति भावः शास्त्रीयसरणिं शास्त्रोक्तसदाचारनिष्ठां अनुसरेदिति विधिः[1] ।

व्याख्यान्तरे—मुकुन्दे स्वभरं निक्षिप्य स्थितः अत एव मुक्तवदनघः विनष्टपापः स्वयमविदितं स्वामिन ईश्वरस्य हृदयं येन स तथोक्तः असौ प्रपन्नः स्वतन्त्रस्य आज्ञया श्रुतिस्मृतिरूपया सिद्धां अवश्यकर्तव्यां, किञ्च परित्यागे अकरणेन सद्यः स्वस्य परेषां शिष्यपुत्रादीनां च विविधानां लोकापवादमुखोल्लासभङ्गादिरूपेण च बहुविधानां अनर्थानां जननात् अलङ्घ्यां अनतिक्रमणीयां विधिचोदितां सरणिं कर्मानुष्ठानमनुसरति । भरन्यासेन विगतपापस्य लोकापवादमुखोल्लासभङ्गादिपरिहाराय शास्त्रीयकर्म मोक्षपर्यन्तं कर्तव्यमिति भावः ॥ ३७ ॥

अथान्तिमेन पद्येन कैङ्कर्येषु भगवदभिमतज्ञापकानि बहुविधानि सन्तीत्याह[2]-

**श्रुतिस्मृत्याचारैस्स्वमतिगतिभिश्शुद्धमनसां**
**सुसङ्कल्पै धर्मैः) [[3]धर्म्यैः] कुलचरणदेशादिसमयैः ।**
**नियोगैर्योग्यानां नियमयितुरादेरभिमतं**
**निमित्तस्वप्नाद्यैरपि निपुणमन्विच्छति बुधः ॥ ३८ ॥**

प्रथमं श्रुतिः यद्विधत्ते तद्भगवदभिमतमिति वेदितव्यं, तद्वत् स्मृत्या मन्वादिस्मृतिभिः सतामाचारै[4]श्च [5]स्वमते[:] गतिस्मृतिः यत्र स्वस्य प्रीतिः तदपि भगवदभिमतं, "[6]वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् । आचारश्चैव

---

1. विधिः । वेदे ललोटाविति सिध्यति । तद्वदत्रापि ॥ अथ शास्त्रीयनियमनाधिकारान्तिमेन पद्येन
2. -ह-श्रुतीति । श्रुतिस्मृत्याचारैः प्रथमं
3. In R. S.
4. च Omitted
5. स्वस्वमतेर्गतिः दृष्टिः यत्र
6. एभिः "वेदो

साधनामात्मनस्तुष्टिरेव च " ॥ इति स्मृतिवचनार्थो दर्शितः । [1]शुद्धमनसां " वेदशास्त्र-[2]रथारूढा ज्ञानखड्गधरा द्विजाः । क्रीडार्थमपि यद्ब्रूयुः स धर्मः परमो मतः " ॥ इत्युक्तानां अधि[3]गतवेदशास्त्राणां अपक्षपातिनां महतां धर्मैः सुसङ्कल्पैः धर्मादनपेतैः " क्रीडा[4]र्थमिति यद्ब्रूयुः [5]स धर्मः परमो मतः " इत्युक्तैरेवं कुर्विति तेषां प्रशासन-रूपैर्वचनैः । अत्र सङ्कल्पशब्दः प्रशासनपरः । कुलचरणदेशादिसमयैः, कुलानि जातयः, चरणाः शाखाभेदाः, देशाः द्रमिडादयः, तन्नियमैः कुलनियमाः [6]य[थ]र्षि-शाखा [7]विदधातीत्याद्याः. चरणनियमाः आपस्तम्बबोधायनादिसूत्रोक्ताः, देशनियमाः " नर्मदोत्तरदेशस्थैः कर्तव्यं सिंहसू(र्यः)[[8]र्यके] " इत्यादयः, [9]आदिशब्देन वर्णाश्र-मादिसमयपरिग्रहः । समयशब्दोऽत्र आचारपरः । [10]योग्यानां नियमैः, निमित्तानि गौलीशकुनादयः, स्वप्नाः देवपित्रुपदेशवाक्यानि [11]तदाद्यैश्च बुधः कृती, आदेः नियमयितुः आदिनियामकस्य भगवतः अभिमतिं अत्र भगवतोऽभि[12]मतिरस्तीति निपुणं सचातुर्यं अन्विच्छति अन्विष्यात् जानीयादित्यर्थः । एवं तैस्तैरुपायैः भगवतोऽभिमतिं ज्ञात्वा[13] तदभिमतमेव कैङ्कर्यं कुर्यादिति भावः ॥ ३८ ॥

---

1. स्वस्य मनःप्रीतिस्तु विकल्पितमतः इत्यर्थः । शुद्धमनसाः
2. शास्त्र Omitted
3. -कृतवेद-
4. -र्थमपि
5. स Omitted
6. यथर्षि-
7. -निद-
8. -र्यके इ-
9. "अध्यायानां उपाकर्म श्रावण्यां तैत्तिरीय(कः)[काः] । बह्वृचाः श्रवणे कुर्युः" इत्यादयः चरणनियमाः आदि-
10. (योग्यनारी)[योग्यानां नि]योगैः दक्षिणादिभिः प्रीतानां योग्यानां अनुग्रहैश्च निमि—
11. आदिशब्देन सुग्रीवमतबालरामायणादि । स्वस्वपरिचितपरीक्षणैश्च बुधः कृतिचतुरः आदेः
12. -मतिमस्तीति
13. मत्वा

## ॥ अपराधपरिहाराधिकारोऽष्टादशः ॥

[1]अपराधपरिहाराधिकारपद्ययोराद्येन पद्येन प्रपन्नः सर्वपापविनिर्मोक्षात्परिशुद्धः पुनरपि यद्यसकृदपराधं कुर्यादसौ प्राज्ञैः परित्याज्यो भवतीत्याह[2]—

स्वच्छस्वादुसदावदातसुभगां दैवादयं देहभृत्
मालिन्यप्रशमाय माधवदयामन्दाकिनीं विन्दति ।
यद्यप्येवमसावसारविषयस्रोतःप्रसूतैः पुनः
पङ्कैरेव कलङ्कयन्निजतनुं प्राज्ञैर्न संश्लिष्यते ॥ ३९ ॥

अयं देहभृत् दैवात् मालिन्यप्रशमाय सर्वपापविनिर्मोक्षणाय स्वच्छामकल्मषां भोग्यतया स्वादुभूतां [3]सदावदातां शुभ्रवर्णां, दयायाः [4]शुभ्रवर्णत्वं औपचारिकं,[5] सुभगां रम्यां इमानि विशेषणानि उभयत्र समानि । माधवस्य दयामन्दाकिनीं कृपागङ्गां विन्दति लभते । एवं भगवत्कृपारूपां प्रपत्तिं लब्धवानसौ प्रपन्नोऽयं पुनः प्रपत्तेः पश्चात् असाराणि यानि विषयस्रोतांसि तत्रोत्पन्नैः पङ्कैः निजतनुं स्वस्वरूपं कलङ्कीकुर्वन् यदि पङ्कैरेवेत्येवकारेण सकृत्करणं प्रामादिकत्वान्न दोषावहमित्यवगम्यते । असकृत्कलङ्कयति चेत् अयं प्राज्ञैः ज्ञानिभिः न संश्लिष्यते न परिगृ(ह्णी)[ह्य]ते[6] त्यज्यत एवेत्यर्थः ।

[7]असौ प्रपन्नः असाराः अनर्थमिश्रतया निस्साराः विषयाः शब्दस्पर्शादयः त एव स्रोतांसि प्रवाहाः तेभ्यः प्रसूतैरुत्पन्नैः पङ्कैः पापैः प्रपत्तिवैभवेन

---

1. अथ अप-
2. -ह-स्वच्छेति ।
3. परिपाकसदा-
4. -र्णकत्वं
5. इमानि......समानि before सुभगां
6. -गृह्यते।
7. This para is perhaps from anothe r व्याख्या hence omitted

निवृत्तरूपां निजतनुं पुनः कलङ्कयन् प्राज्ञैः भागवतैः यद्यपि न संश्लिष्यते तथाप्ययं देहभृत् मालिन्यप्रशमाय पापनिवृत्तये, स्वच्छां अष्टैश्वर्यप्रदां स्वादुभूतां अपूर्वैश्वर्यप्रदां सदावदातां मुक्तिप्रदां सुभगां आत्मप्राप्तिप्रदां, माधवदयैव मन्दाकिनी तां दैवात् पुनश्चरणादिरूपात् प्रायश्चित्तात् विन्दति प्राप्नोति ॥ ३९ ॥

अथापराधपरिहारा[1]धिकारान्तिमेन पद्येन प्रपन्ने भगवतः सर्वपापमोचनप्रकारं दर्शयति[2]—

**प्रारब्धेतरपूर्वपापमखिलं प्रामादिकं चोत्तरं**
**न्यासेन क्षपयन्ननभ्युपगतप्रारब्धखण्डश्च नः ।**
**धीपूर्वोत्तरपाप्मनामजननात् जातेऽपि तन्निष्कृतेः**
**कौटिल्ये सति शिक्षयाऽप्यनघयन् क्रोडीकरोति प्रभुः ॥ ४० ॥**

प्रभुरीश्वरः नः प्रपन्नानां [3]प्रारब्धादितरत्पूर्वं पूर्वजन्मार्जितं पापमखिलं, प्रामादिकं प्रमादसम्भूतं उत्तरं प्रपत्तेरुत्तरं कृतं पापं च अनभ्युपगतप्रारब्धखण्डं [4]चाज्ञानतः कृतं प्रारब्धपापांशं च न्यासेन क्षपयन् प्रपत्त्यनुष्ठानेनैव नाशयन् धीपूर्वोत्तरपाप्मनामजननात् ज्ञानपूर्वाणामुत्तरपापानां ज्ञानिनि प्रपन्ने असम्भवात्, जातेऽपि ज्ञानपूर्वे जाते[5] तत्पापं निष्कृतेः क्षपयन् प्रायश्चित्तद्वारा नाशयन् कौटिल्ये सति कुटिलतया प्रायश्चित्तमकुर्वाणे सति शिक्षयाऽप्यनघयन् "खञ्जा भवन्ति[6] काणा भवन्ति" इत्यादिश्रुत्युक्तप्रकारेण खञ्जत्वादिदण्डं निपात्य निष्पापं कुर्वन्

---

1. अधिकार Omitted
2. -ति-प्रारब्धेति ।
3. -ब्धेतरपूर्वपापमखिलं प्रारब्धं नाम फलोन्मुखं प्रारब्धांशादितरत् पूर्वं पूर्वार्जितं पापमखिलं सर्वाजन्मार्जित (?) प्रामादिकश्चोत्तरं प्रमादसम्भूतं प्रपत्तेरुत्तरकृत्यं पापे च अन-
4. च ज्ञान-
5. -तेऽपि तत्पापं
6. काणा भवन्ति Omitted

एवं सर्वशः प्रपन्नं क्रोडीकरोति अङ्गीकरोत्येव । अतः कृतायाः प्रपत्तेः फलाभावस्वरूपहानिः कदाचिदपि नास्तीति भावः ॥ ४० ॥

## ॥ स्थानविशेषाधिकार एकोनविंशः ॥

अथ स्थानविशेषाधिकारपद्ययोराद्येन पद्येन प्रपन्नस्य यत्र भगवदाराधनादेरानुकूल्यमस्ति, यत्र च येन[1] केनापि परमैकान्तिना सहवासो लभ्यते स एव सर्वोत्तरो देशो नान्य इत्याह[2]—

**यत्रैकाग्र्यं भवति भगवत्पादसेवार्चनादेः**
**यत्रैकान्त्यव्यवसितधियो यस्य कस्यापि लाभः ।**
**वासस्थानं तदिह कृतिनां भाति वैकुण्ठकल्पं**
**प्रायो देशा मुनिभिरुदिताः प्रायिकौचित्यवन्तः ॥ ४१ ॥**

यस्मिन् देशे भगवत्पादसेवार्चनादेरैकाग्र्यं चित्तस्वास्थ्याद्यानुकूल्यमस्ति, यत्र च भगवत्पारमैकान्त्यनिश्चितबुद्धेः यस्य कस्यापि भागवतस्य सहवासलाभः सिध्यति । यस्य कस्येत्युक्त्या जात्यादिनियमो नास्तीति गम्यते । तदेव वासस्थानं इह जगति कृतिनां[3] वैकुण्ठसदृशं [4]भाति सर्वोत्कर्षेण दीप्यते । मुनिभिरुदिताः "अयोध्या मधुरा माये" त्यादिभिः कथिताः प्रायो बहवः देशाः प्रायिकौचित्यवन्तः [5]प्राय उचिता भवन्ति[6] ।

---

1. यस्य कस्या-
2. -ह-यत्रेति ।
3. -नां चतुर्णां वै-
4. -शं वासस्थानं भवति । भातीत्युक्त्या सर्वो ...... ते इति गम्यते । मुनि-
5. प्रायेण उचि-
6. -न्ति । एते च उचिता अन्ये च सन्तीति भावः । एतच्छ्लोकोक्तो देशश्च वासयोग्य इत्युपलक्षितो भवति । किन्तु अयोध्यादीनां तु इदानीं तुलुष्काक्रान्ततया दुष्टतया अत्रोक्तो देशः परिग्राह्यः इति गम्यते ।

व्याख्यान्तरे—आदिशब्देन भागवतार्चनादिकं विवक्षितं, प्रायिकं प्रचुरं औचित्यं वासयोग्यत्वं, तद्वन्तः, मुनिभिस्तु प्राचुर्येण तेषां वासयोग्यत्वं अस्तीत्युक्तं, न तु तत्रैव वस्तव्यमिति नियमः कृतः इति भावः ॥ ४१ ॥

अथ स्थानविशेषाधिकारान्तिमेन पद्येन काश्यादिस्थलानां आधिक्यं भागवताभिमानादेव। तद[भावे] तेषामपीतरसाम्यं[1] भवति। अतो भागवताभिमतो देश एव वासयोग्य इत्याह[2]—

**सा काशीति न चाकशीति भुवि सायोध्येति नाध्यास्यते**
**सावन्तीति न कल्मषादवति सा काञ्चीति नोदञ्चति।**
**धत्ते सा मधुरेति नोत्तम[3]धुरं मान्यापि नान्या पुरी**
**या वैकुण्ठकथासुधारसभुजां रोचेत नो चेतसे॥ ४२॥**

या पुरी वैकुण्ठकथासुधारसभुजां भागवतानां चेतसे नो रोचेत न रोचते नाभिमता[4] भवति, सा पुरी काशीति नाममात्रेण[5] न चाकशीति न प्रकाशते। भुविपदस्य सर्वत्राप्यनुषङ्गः। अयोध्येति नाममात्रेण नाध्यास्यते। सर्वैः सा[6] अवन्तीति नाम[7]मात्रेण आश्रितान् कल्मषान्नावति। सा काञ्चीति नाममात्रेण नोदञ्चति नोत्कृष्टा भवति। सा मधुरेति नाममात्रेण आश्रितानामुत्तमधुरं उत्कृष्टां धुरं न धत्ते[8]। अन्यापि माया द्वारवती च नाममात्रेण पूज्या न भवति। किन्तु भागव-

---

1. साम्यता [?]
2. -ह-सा काशीति।
3. धुरां in Commenteries of R. s.
4. -मते भव-
5. -मात्रेण चकास्ति। सायोध्येति नाममात्रेण
6. सा पुरी अव-
7. -मात्रात्
8. -त्ते न (नि)[व]हति।

ताभिमानादेव सर्वासामाधिक्यं [1]भागवताभिमानो यत्रास्ते स सर्वोऽपि वासयोग्यो भवतीति भावः ।

व्याख्यान्तरे-सा मधुरेति हेतोः उत्तमधुरं पुण्यस्थलेषु प्राधान्ये न धत्ते । भागवताभिमानाभावे पुण्यस्थलान्यपि न योग्यानि । भागवताभिमाने सति पुण्यस्थलवत् अन्यानि स्थलान्यपि योग्यानीति भावः ॥ ४२ ॥

## ॥ निर्याणाधिकारो विंशः ॥

अथ निर्याणाधिकारपद्ययोराद्येन पद्येन प्रपन्नस्य शरीरादुत्क्रान्तिक्रममाह—[2]

**मनसि करणग्रामं प्राणे मनः पुरुषे च तं**
**झटिति घटयन् भूतेष्वेनं परे च तमात्मनि ।**
**स्वविदविदुषोरित्थं साधारणे सरणेर्मुखे**
**नयति परतो नाडीभेदैर्यथोचितमीश्वरः ॥ ४३ ॥**

ईश्वरः करणानां बाह्यानां चक्षुरादीनां समूहं, [3]म(नः)[नसि]प्रथमं घटयन् योजयन्, मनश्च प्राणवायौ घटयन्, तं च प्राणं पुरुषे जीवे घटयन्, सर्वत्र झटितीत्यनुषज्यते । [4]एवमेतैर्विशिष्टं जीवं भूतेषु सूक्ष्मेषु सूक्ष्मशरीरेषु[5] घटयन्नित्यर्थः । तं भूतसूक्ष्मविशिष्टं जीवं परमात्मनि स्वस्मिन् [6]घटयन् सन्, स्वं वेत्ति विन्दतीति वा स्ववित् प्रपन्नः अविद्वान् संसारी तयोः ज्ञान्यज्ञानिनोः सरणेः मार्गस्य मुखे

---

1. स भा-
2. -ह-मनसीति ।
3. मनसि प्र-
4. एनमे-
5. शरीरे घट-
6. -स्वस्मिन् विश्रमयति सरणेः अर्चिरादेर्मार्गस्य मुखे-

पूर्वभागे उत्क्रान्तिरूपे,[1] इत्थं साधारणे तुल्ये सति परतः उत्क्रान्तेः परं, यथोचितं यथायोग्यं नाडीभेदैः प्रपन्नं सुषुम्नया मूर्धन्यनाड्या, इतरान् तदितराभिः नाडीभिः नयति गमयति ।

व्याख्यान्तरे—यथोचितं तत्स्वरूपोचितं,[2] यदान्तरा? नाडीभेदैर्नयति तत्तल्लोकान् प्रापयति । तामसानां अधोनाड्यः अन्येषामूर्ध्वनाड्यः, तत्रापि मुमुक्षोः शताधिकोर्ध्वनाडीति भावः ॥ ४३ ॥

अथ निर्याणाधिकारान्तिमेन पद्येन प्रपन्नानुत्क्रान्तौ अर्चिरादिमार्गगमनाय कूपपतितसुतोद्धर्तृपितृन्यायेन स्वहृत्स्थो देवः तदा सुषुम्नानाडीं प्रवेशयतीत्याह[3]—

दहरकुहरे देवस्तिष्ठन्निषद्वरदीर्घिका-
निपतितनिजापत्यादित्सावतीर्णपितृक्रमात् ।
धमनिमिह नस्तस्मिन् काले स एव शताधिका-
मकृतकपुरप्रस्थानार्थं प्रवेशयति प्रभुः ॥ ४४ ॥

निषद्वरदीर्घिका पङ्कमयी वापिका तस्यां निपतितस्य निजपुत्रस्य आदानेच्छया तत्रावतीर्णो यः पिता तन्न्यायेन दहरकुहरे हृदयाकाशे तिष्ठन् प्रभुः देवः तस्मिन् काले उत्क्रान्तिसमय एव स्वयमेवाकृतकपुरं [4]श्रीवैकुण्ठं प्रति प्रस्थानाय नः प्रपन्नान् इह शरीरे शताधिकां धमनिं "शतञ्चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिस्सृतैका । तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति" ॥ इत्युक्तां सुषुम्नां नाडीं प्रवेशयति नान्याम् ॥ ४४ ॥

---

1. -रूपे स्वविदविदुषोः साधारणे सति स्वं वेत्ति विन्दतीति वा स्ववित् प्रप(न्नैः)[न्नः] अविद्वान् संसारी तयोः स्वविदविदुषोः उभयोरपि इत्थं उत्क्रम(ण)[णे] साधारणे सति उत्क्रान्तावुभयोस्समानायां सत्यां परतः उत्क्रान्तेः परं यथोचितं

2. -चितं यथा भवति तथा नाडी in D. No. 5345. ms.

3. -ह-दहरेति । निषद्वरेत्यादि । निषद्वरादीर्घिका

4. वैकुण्ठपुरं प्रति

## ॥ गतिविशेषाधिकार एकविंशः ॥

अथ गतिविशेषाधिकाराद्येन[1] पद्येन भगवता सुषुम्नानाडीं प्रवेशितोऽयं अर्चिरादिगत्या विरजां तीर्त्वा परमपदं [2]प्रविशतीत्याह—

ज्वलनदिवसज्योत्स्नापक्षोत्तरायणवत्सरान्
पवनतपनप्रालेयांशून् क्रमादचिरद्युतिम् ।
जलधरपतिं देवाधीशं प्रजापतिमागत-
स्तरति विरजां दूरे वाचस्ततः परमद्भुतम् ॥ ४५ ॥

ज्वलनः अर्चिः पुरुषः आतिवाहिकानां प्रथमः, [3]तं दिवसं अहरभिमानिनं, ज्योत्स्नापक्ष शुक्लपक्षाभिमानिनं, उत्तरायणाभिमानिनं वत्सराभिमानिनं, [4]वाय्वभिमानिनं, सूर्याभिमानिनं, चन्द्राभिमानिनं, विद्युदभिमानिनं, जलधरपतिं वरुणं, देवाधीशं इन्द्रं, प्रजापतिं [5]ब्रह्माणं, [6]क्रमादागतः प्राप्तः[7] तेभ्यः पूजां प्राप्त इत्यर्थः । विरजां नदीं तरति । ततः परं [8]विरजातरणानन्तरं, वाचोदूरे स्थितं वाचामगोचरस्वभावं अद्भुतं स्थानमिति [9]विशेषः । [10]प्राप्नोतीति शेषः ॥ ४५ ॥

---

1. -धिकारपद्ययोः आद्येन
2. प्रवेशयतीत्याह-ज्वलनेति ।
3. तमागच्छति ततः क्रमेण दिवसं
4. पवनं वायुं तपनं सूर्यं प्रालेयांशुं चन्द्रं अचिरद्युति विद्युदभिमानिनं वद्युतं जलधर-
5. च added ब्रह्माणं omitted
6. क्रमागतः
7. प्राप्तः अनन्तरं विरजां
8. विरजा to नन्तरं omitted
9. वि omitted
10. तरति प्राप्नोतीत्यनुषज्यते ॥ 45 ॥

[1]गतिविशेषाधिकारान्तिमेन पद्येन भगवाननादिकाले संसारमरुकान्तारे याता-यातपरिश्रान्तान् प्रपन्नान्[2] धर्माधिवाहिकैरतिवाह्यान् परस्मिन् पदे निजपद[3]च्छाया-दानेन सुखयतीत्याह[4]—

**पितृपथघटीयन्त्रारोहावरोहपरिभ्रमैः**
**निरयपदवीयातायातक्रमैश्च निरन्तरैः ।**
**अधिगतपरिश्रान्तीनाज्ञाधरैरतिवाह्य नः**
**सुखयति निजच्छायादायी स्वयं हरिचन्दनः ॥ ४६ ॥**

[5]हरिचन्दनः [6]पितृपथो धूमादिमार्गः, देवलोकमार्गः स एव घटीयन्त्रं [7]तदारोहावरोहरूपैः परिभ्रमैः भ्रमणैः, निरयपदवी नरकमार्गः, तत्र च निरन्तरैः अविच्छिन्नैः, यातायातानां गमनागमनानां, क्रमैः [8]आवृत्तिभिरित्यर्थः । अधिगत-परिश्रान्तीन् प्राप्तपरिश्रमान् नः स्वयमाज्ञाधरैः आतिवाहिकगणैः[9] अतिवाह्य अर्चि-रादिमार्गेणातिवाहनं कारयित्वा परपदे निजच्छायादायी सन्[10] सुखयति निजश्री-पादयोः संसारतापहन्त्रीं[11] छायां दत्वा निरतिशयानन्दं प्रापयतीत्यर्थः ॥ ४६ ॥

---

1. अथ
2. -न्नान् इत्थमातिवाहिकैरतिवाह्य परस्मिन्
3. -पाद-
4. -ह-पितृपथेति ।
5. हरिःचन्दन इव हरि-
6. तरुविशेषः कल्पद्रुमविशेषो हरिः । पितृपथेत्यादि । पितृपथो
7. ஏற்றம் பூண்ட நடையாகவுமாம் तदा-
8. (पर्यै) [पर्याये] रावृत्तिभिरित्यर्थः । प्राप्तपरिश्रमान
9. -गणैः आज्ञाधराः आज्ञापरिपालकाः अनुचराः तैरतिवाह्य अर्चिरादिमार्गस्य अतिवाहनं कारयित्वेत्यर्थः । परमपदे निज—
10. सन् निजदपादयोः छायां दत्वा यस्य छायामृतं उपछायामिव घृणेः ''वासुदेव-तरुच्छाया नातिशीता न (कल्मषामि)[घर्मदा'' । इ]त्युक्तां संसार-
11. -न्त्रीमिति भावः । सुखयति निरतिशया-

## ॥ परिपूर्णब्रह्मानुभवाधिकारो द्वाविंशः ॥

[1]परिपूर्णब्रह्मानुभवाधिकारपद्ययोराद्येन पद्येन परमपदं [2]प्रापित(स्सन्)[स्य]-सपदि पूर्णब्रह्मानुभवप्रकारं दर्शयति[3]—

वितमसि पदे लक्ष्मीकान्तं विचित्रविभूतिकं
सचिवगमितस्सम्पद्याविर्भवत्सहजाकृतिः ।
स्फुटतदपृथक्सिद्धिः सिध्यद्गुणाष्टकतत्फलो
भजति परमं साम्यं भोगे निवृत्तिकथोज्झितम् ॥ ४७ ॥

[4]सचिवगमितः आतिवाहिकैः अर्चिरादिकया गत्या परमपदं प्रापितोऽयं वितमसि पदे तमसः परस्मिन् स्थाने श्रीवैकुण्ठे[5] नानाविधा आश्चर्यभूताश्च विभूतयो लीलाभोगरूपाः यस्य, यद्वा विचित्रा [6]विभूतयो गुणविभूतयश्च[7] यस्य तं लक्ष्मीकान्तं सम्पद्य[8] समेत्य आविर्भवन्ती सहजा स्वतस्सिद्धा संसारदशायां तिरोहिता आकृतिः निरञ्जनत्वनिर्दुःख[9]त्वादिरूपा यस्य सः, [10]स्फुटा स्पष्टत्वेन दृष्टा, तस्मात् ब्रह्मणः पृथक्सिद्ध्यभावः यस्य सः प्रत्यक्षितस्वस्वामिशरीरशरीरिभाव इत्यर्थः । सिध्यद्गुणाष्टकतत्फलः प्रादुर्भवद्गुणाष्टकमेव अपहतपाप्मत्वादिकं[11] तत्फलं, स्वरूपाविर्भावस्य

---

1. अथ added
2. प्रापितस्यास्य परिपूर्ण-
3. -ति-वितमसीति ।
4. -गमतिः
5. वैकुण्ठलोके विचित्रा नाना-
6. वि omitted
7. -तयः चरित्रविभूतयश्च
8. -द्य सम्पदं एत्य आविर्भवत्सहजाकृतिः आविर्भवन्ती सहजा
9. -त्वनिरसिकज्ञानरूपा
10. स्फुटतदपृथक्सिद्धिः स्फुटा—
11. -त्वादिकमेव

फलं यस्य सः, [1]सिध्यद्गुणाष्टकञ्च तत्फलं, गुणाष्टकस्य फलभूतः[2] परिपूर्णब्रह्मानुभवश्च यस्य सः, भोगे परब्रह्मानुभवरूपे[3] परमं साम्यं ब्रह्मणेत्युक्तेः भजति । "भोगमात्रसाम्यलिङ्गाच्चे" ति सूत्र ज्ञानतो भोगमात्रतश्च ब्रह्मण[4]स्साम्यो(क्तिः)[क्तेः] जगत्कारणत्वाद्यसाधारणाकारैस्साम्यं व्या[5]व(र्त्यतेऽति) [र्तयति । or र्त्येतेति] ईदृशं निवृत्तिकथोज्झितं [6]पुनरावृत्तिसङ्गरहितमित्यर्थः ॥ ४७ ॥

अथ परिपूर्णब्रह्मानुभवाधिकारान्तिमेन पद्येन स्वप्रार्थनामुखेन परिपूर्णब्रह्मानुभवपरीवाहप्रकारं[7] दर्शयति[8]—

अविश्रान्तश्रद्धाशतकलहकल्लोलविषमा
ममाविर्भूयासुर्मनसि मुनिसिद्धादिसुलभाः ।
मधुक्षीरन्यायस्वगुणविभवासञ्जनकन-
न्महानन्दब्रह्मानुभवपरिवाहा बहुविधाः ॥ ४८ ॥

अविश्रान्तं निरन्तरं प्रवृत्तं श्रद्धाशतं तत्तत्प्रवाहविषयादरशतं[9] तस्य [10]ये अन्योन्यं कलहाः [11]अयं प्रथमं अनुभवितव्यः, अयं प्रथममनुभवितव्य इति[12] त

---

1. यद्वा सिध्य-
2. –भूतं
3. -रूपे "सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिते"त्युक्तः परमसाम्यं ब्रह्मणा सहेति शेषः। सह ब्रह्मणेत्युक्तेः उपैति। भोगमात्र—
4. ब्रह्मणा साम्योक्तेः
5. -वर्तते। तेन कीदृशं निवृत्ति-
6. निवृत्तिसङ्गरहितं पुनरा—
7. -प्रकारान्
8. -ति-। अविश्रान्तेति।
9. -तं प्रतिपरीवाहं श्रद्धा उत्पद्यन्ते। तस्य—
10. -यो to कलहः
11. अथ प्र-
12. -ति कलहः कलहा [:]कल्लोलाः

एव कल्लोलाः तैर्विषमा दुर्विगाहा [1]अनुभवितुमशक्याः, [2]मुनयः उपासकाः, यद्वा सनकादयः सिद्धाः, नित्यसिद्धाः अनन्तगरुडादयः, आदिशब्देन [3]मुक्ता गृह्यन्ते, तेषां सुलभाः परिचयबलेन भोक्तुं सुलभाः, [4]मधुमिश्रं यत् क्षीरं तस्य यो न्यायः तेन स्वस्यात्मनो यो गुणविभवः योग्यतातिशयः आत्मस्वरूपे ऐश्वर्यादपि भोग्यतातिशयोऽस्ति, तस्यासञ्जनमनुभवस्तेन कनन्तः अतिभोग्यतया दीप्यमानाः, क्षीरं स्वतः स्वादु, मधु च स्वादु, [5]तन्मिश्रणे क्षीरस्य स्वादुता अतिशयिता भवति । एवं [6]स्वात्मविशिष्टपरमात्मानुभवैक[7] स्वस्वरूपभोग्यताविशेषितब्रह्मस्वरूपभोग्यता, निस्समाभ्यधिका भवति,[8] महानन्दब्रह्मानुभवपरीवाहा मम मनस्याविर्भूयासुः । महानन्देति ब्रह्मविशेषणं प्रवाहविशेषणं वा ॥ ४८ ॥

अथार्थानुशासनरूपप्रथमभागान्ते उक्ताधिकारार्थानामनुक्रमरूपं पद्यमाह[9]—

---

1. दुरवगाहाः
2. मुनिसिद्धादिसुलभाः मुन-
3. -क्ताश्च । तेषां
4. -भाः, किञ्च मधुक्षीरेत्यादि । मधुमिश्रं क्षीरं मधुक्षीरं तन्न्यायो क्षीरं स्वतस्स्वादु
5. ते तन्मिश्रेण क्षी-
6. स्वगुणविभवासञ्जनेन स्वस्यात्मनो यो गुणविभवः भोग्यतातिशयः आत्मस्वरूपे ऐश्वर्यादपि भोग्यतातिशयोऽस्ति । तस्यासञ्जनं तेन ब्रह्मणो विशेषणं स्वात्मविशिष्ट—
7. नुभवे स्वस्वरू—
8. भवति । कनत् जीवात्मस्वरूपजगुणविभवासञ्जनेनातिभोग्यतया दीप्यमानः महान् आनन्दो यस्य तत् । महानन्दश्च तत् ब्रह्म च तस्यानुभवपरीवाहाः ब्रह्मविषयानुभवपरम्पराः बहुविधाः, सर्वस्वदानान्तर्भावात् ते मम मनसि आविर्भूयासुः प्रलक्ष्यन्ते । अस्मिन् पक्षे अविश्रान्तश्रद्धाशतं तत्तत्कैङ्कर्यसुखविषयं । बहुविधानि भगवदनुभवपरीवाहरूपकैङ्कर्यसुखानि मम मनसि आविर्भूयासुः इति विवेकः । 48 । —
9. -ह-सन्दष्ट इति ।

**सन्दृष्टस्सारवाग्वित्स्वपरनिशितधीस्सङ्गजिन्नैकसंस्थः**
**स्पष्टोपायोऽतिखिन्नः सपरिकरभरन्यासनिष्पन्नकृत्यः ।**
**स्वावस्थार्हं सपर्याविधिमिह नियतं व्यागसं क्वापि बिभ्र-**
**न्निर्मुक्तस्थूलसूक्ष्मप्रकृतिरनुभवत्यच्युतं नित्यमेकः ॥ ४९ ॥**

[1]एकस्संसरन् [चे]तनः [2]सन्दृष्टः प्रथमगुरुणा कटाक्षितः[3], अनेन उपोद्घाताधिकारार्थः सूचितः । सारवाक् साराख्या वाक् रहस्यत्रयरूपा तां वेत्ति विन्दति वा [4]सारनिष्कर्षी सन् [5]स्वपदनिशितधीः, स्वविषया परमात्मविषया [नि]शिता निश्चिता धीर्यस्य [6]सः, अनेन[सारनिष्कर्ष]प्रतितन्त्रार्थपञ्चकतत्त्वत्रयपरदेवतानिर्णयार्थाः सङ्गृहीताः । सङ्गः प्रकृत्यभिलाषः तज्जित्[7] उत्पन्नवैराग्यः, नैकसंस्थः भक्त्यधिकाराद्भिन्ने अकिञ्चनाधिकारे स्थितः, स्पष्टोपायः स्पष्टत्वेन [8]निर्णीतोपायः, अतिखिन्नः उपायान्तरदौष्कर्यादिति भावः । [अनेन मुमुक्षुत्वाधिकारिविभागोपायविभागप्रपत्तियोग्याधिकारार्थाः सङ्गृहीताः ।] सपरिकरे[9] भरन्यासे निष्पन्नकृत्यः, [10]परिकरशब्देन परिकरविभागाधिकारार्थः, भरन्यासशब्देन साङ्गप्रपदनाधिकारार्थः, निष्पन्न[11]कृत्यशब्देन कृतकृत्याधिकारार्थः [12]सूचितः । स्वावस्थार्हं

---

1. अथ संसरन् चेतनः
2. सन्दृष्टः omitted
3. -तः भवति । अतः सन्दृष्ट इत्युपोद्घाताधिकारार्थसङ्ग्रहः । सारवाक्
4. तदनन्तरं added
5. स्वपर-
6. स्वस्वभावपरस्वभावविवेकात् । अनेन शरीरशरीरिभावेन प्राप्तृप्राप्यरूपेण भोक्तृनियन्तृरूपेण अवरत्वपरत्वरूपेण च स्वपरनिशितधीरित्युक्तं, तेन प्रतितन्त्रार्थपञ्चकतत्त्वत्रयपरदेवतानिर्णयार्थाः सङ्गृहीताः । सङ्गजित् संगः
7. तज्जित् प्रपन्नवैराग्यः मुमुक्षुः नैकस्संस्थः । भक्त्य—
8. निर्णीतः स्वानुरूपं प्रत्युपायः
9. -रिकरभरन्यासे
10. सपरि-
11. -कृत्य omitted
12. अः सूचितः ।

स्वनिष्ठाभिज्ञानानुगुणं सपर्याविधिं [1]स्वनिष्ठाभिज्ञानाधिका(र:)[रार्थ:] उत्तरकृत्याधिका(र:)[रार्थ:]सूचित: ।

अत्र सपर्याशब्देन सपर्याकाष्ठा भागवतकैङ्कर्यविशेष उच्यते, तेन पुरुषार्थकाष्ठाधिका(र:)[रार्थ:] [2]सूचित: । नियतमिति शब्देन शास्त्रीयनियमनाधिकारार्थ:, व्यागसमित्यनेन अपराधपरिहाराधिकारार्थ:, क्वापि बिभ्रदित्यनेन स्थानविशेषाधिकारार्थ:, निर्मुक्तस्थूलसूक्ष्मप्रकृतिरित्यनेन निर्याणाधिकारार्थ:, गतिविशेषाधिकारार्थ:, नित्यमच्युतमनुभवतीति परिपूर्णब्रह्मानुभवाधिकारार्थ उक्त: ॥ ४९ ॥

[ अर्थानुशासनभाग: प्रथम: समाप्त:[3] । ]

—: * :—

## ॥ सिद्धोपायशोधनाधिकारस्त्रयोविंश: ॥

अथ स्थिरीकरणभागे सिद्धोपायशोधनाधिकारपद्ययोराद्येन पद्येन सर्वज्ञ: सर्वशक्ति: परमकारुणिक: श्रिय:पतिरेव सिद्धोपाय इत्याह[4]—

युगपदखिलं प्रत्यक्षेण स्वतस्सततं विदन्
निरवधिदयादिव्योदन्वानशक्यविवर्जित: ।
जलधिसुतया सार्धं देवो जगत्परिपालयन्
परमपुरुषस्सिद्धोपाय: प्रतीष्टभरस्सताम् ॥ ५० ॥

[5]अखिलं विदन् सर्वज्ञ:, [6]व्यावृत्तिमाह—युगपदिति । एककाल एव[7] अन्ये

---

1. -विधि उत्तरकृ-
2. -श्च सूचि-
3. Chapter subheading from the Rahasyatrayasāra.
4. -ह-युगपदिति ।
5. अत्र प्रथमचरणेन अस्य सर्वज्ञत्वं शोधयति । अखिलं
6. अन्येषां सर्व(ज्ञात् )व्यावृत्ति-
7. एव सर्वं वेत्ति अन्ये-

तु क्रमेण, इन्द्रियाधीनज्ञानत्वात् । [1]सर्वमपि ईश्वरज्ञानं प्रत्यक्षमेव । अन्येषां ग्रहणस्मरणरूपेण [2]द्विविधं, स्वतस्स्वभावतः अन्येषामेतत्प्रसादाधीनसार्व[3]ज्ञत्वात्, सततं सर्वदा[4], अन्येषां कदाचिदस्ति कदाचिन्नास्ति । ब्रह्मरुद्रादीनां सार्वज्ञे युगपदखिलज्ञानं नास्ति । सर्वशब्दः सङ्कुचितः प्रत्यक्षत्वञ्च[5] सततमपि नास्ति । नित्यमुक्तानां तु सततं युगपत्प्रत्यक्षेण अखिलज्ञानं यद्यप्यस्ति तथापि स्वतो न भवति, परमात्मप्रसादाधीनत्वात्, एवं[6] सर्वव्यावृत्त[7]सार्वज्ञः अशक्यविवर्जितः अशक्यांशरहितः सर्वशक्तिरिति यावत् । निरवधिकदयादिव्योदन्वान् निरवधिदयादुग्धाब्धिः जलधिसुतया श्रिया सार्धं जगद्वि[8]भूतिद्वयं परिपालयन् परमपुरुषः पुरुषोत्तमः श्रियःपतिः सतामाश्रितानां प्रतीष्टभरः स्वीकृतभरः सिद्धोपाय इत्युच्यते ॥ ५० ॥

अथ सिद्धोपायशोधनाधिकारान्तिमेन पद्येन श्रुतिष्वीश्वरः सिद्धोपायत्वेन जोघुष्यमाणोऽपि कुदृष्टिभिरुपायत्वेन न ज्ञायते । अथापि [9]सात्त्विकानामस्मत्सिद्धान्तस्सुलभो भवति यथा भूगतो निधिः उपर्युपरि [10]सञ्चरद्भिरपि भाग्यरहितैः न लक्ष्यते, भाग्यवतां सुलभो भवति तद्वदित्याह[11]—

**विश्राम्यद्भिरुपर्युपर्यपि दिवानक्तं बहिर्दर्शने-**
**रस्मद्देशिकसम्प्रदायरहितैरद्यापि नालक्षितः ।**

---

1. –त्वात् । तदपि प्रत्यक्षेण ईश्वरसर्वज्ञानं प्रत्यक्षमेव ।
2. विविधं
3. सार्वज्ञात्
4. वेत्ति in addition
5. न in addition before सतत......
6. भगवान् after एवं
7. -त्तस्सर्व-
8. -गदुभयविभूति परि-
9. सात्त्वतानां
10. चरतामपि भाग्य-
11. -ह- विश्राम्यद्भिरिति ।

स्वप्राप्तेस्स्वयमेव साधनतया जोघुष्यमाणः श्रुतौ
सत्त्वस्थेषु भजेत सन्निधिमसौ शान्तावधिश्शेवधिः ॥ ५१ ॥

श्रुतौ स्वप्राप्तेः स्वयमेव साधनतया जोघुष्यमाणः शान्तावधिः[1] शेवधिः निधिः भक्तानां निधिस्थानीयः भगवान् दिवानक्तं अहोरात्रं उपर्युपरि [2]समीपविश्राम्यद्भिः सञ्चरद्भिरपि बहिर्दर्शनैः स्थूलदृष्टिभिः बाह्यदर्शनस्थैश्च । किञ्चास्मद्देशिकसम्प्रदायरहितैः अस्मदाचार्याणां नाथयामुनयतीन्द्रादीनां सम्प्रदायः उपदेशपरम्परा तद्विधुरैरद्यापि नालक्षितः, सिद्धोपायत्वेन न दृष्टः यथाञ्जनविशेषविधुरैः निधिर्नालक्ष्यते, तद्वदेव[3] बहिर्दर्शनैः अदृष्टोऽपि सत्त्वस्थेषु सात्त्विकजनेषु अस्मद्दर्शनस्थेषु सन्निधिं भजेत सिद्धोपायत्वेन सन्निहितो भवति सदञ्जनवतां निधिरिव ।

व्याख्यान्तरे—उपर्युपरि उत्तरोत्तरं भोगेषु विश्राम्यद्भिः अनवरतभोगतृष्णापरवशैरित्यर्थः । अत एव दिवानक्त अहोरात्रं बहिर्दर्शनैः बाह्यविषयासक्तबुद्धिभिः अस्मद्देशिकानां नाथयामुनयतिवरादीनां सम्प्रदायेन रहितैः तत्सम्प्रदायानभिज्ञैः इत्यर्थः । अद्यापि कठोरतरदुःखानुभवदशायामपि नालक्षितः सिद्धोपायत्वेन न ज्ञातः स्वप्राप्तेः पुरुषार्थस्य स्वयमेव साधनतया श्रुतौ वेदान्ते जोघुष्यमाणः पुनः पुनः प्रतिपाद्यमानः शान्तः निवृत्तः अवधिः देशकालवस्तुपरिच्छेदः यस्य सः शेवधिः आश्रितानां निक्षेपः, असौ भगवान् सत्त्वस्थेषु सात्त्विकेषु सन्निधिं सिद्धोपायत्वेन सन्निधानं भजेत ॥ ५१ ॥

## ॥ साध्योपायशोधनाधिकारश्चतुर्विंशः ॥

अथ साध्योपायशोधनाधिकारपद्ययोराद्येन पद्येन सिद्धोपायवशीकरणार्थौ साध्योपायौ भक्तिप्रपत्ती इत्याह[4]—

---

1. -वधिः निरवधिः शेवधिः
2. समीपे विश्रा-
3. -देवं
4. -ह- यथाधिकरणं [इति]

यथाधिकरणं प्रभुर्यजनदानहोमार्चना-
भरन्यसनभावनाप्रभृतिभिस्समाराधितः ।
फलं दिशति देहिनामिति हि सम्प्रदायस्थितिः
श्रुतिस्मृतिगुरूक्तिभिर्नयवतीभिराभाति नः ॥ ५२ ॥

प्रभुः सर्वेश्वरः यथाधिकारं, यजनं यागः, दानं पात्रेषु द्रव्यत्यागः, होमो नित्य[1]होमादिभिः, अर्चना समाराधनं, [2]भरन्यसनं भरन्यासः, [3]भावना उपासनं, प्रभृतिशब्देन देवालयग्रामप्रतिष्ठादयो गृह्यन्ते । तैस्समाराधितस्सन् देहिनां नः [4]फलं दिशतीति हि सम्प्रदायस्थितिः । श्रुतिस्मृतिभ्यां गुरूक्तिभिः नाथादिग्रन्थैश्च कीदृशीभिः सत्तर्कोपबृंहिताभिः स्फुरति । तस्मान्मोक्षे साध्योपायौ भक्तिप्रपत्ती ।

व्याख्यान्तरे—यथाधिकरणं तत्तत्फलकामनारूपाधिकारं नयवतीभिः युक्तिमतीभिः आभाति ग्राह्यतरत्वेन प्रकाशत इत्यर्थः ॥ ५२ ॥

साध्योपायशोधनाधिकारान्तिमेन पद्येन सर्वशास्त्रविशारदा अस्मदाचार्याः सिद्धोपायवशीकरणार्थे भक्तिप्रपत्ती इत्यस्माकं उपदिष्टवन्त इत्याह[5] । —

तत्तद्धैतुकहेतुके कृतधियस्तर्केन्द्रजालक्रमे
बिभ्राणाः कथकप्रधानगणने निष्ठां कनिष्ठाश्रयाम् ।
अध्यात्मश्रुतिसम्प्रदायकृतकैरद्धा विशुद्धाशयाः
सिद्धोपायवशीक्रियामिति हि नस्साध्यां समध्यापयन् ॥५३॥

---

1. -होमादिः
2. भरन्यसनं omitted
3. भावना omitted
4. तत्तत्फलं ददातीति सम्प्रदायस्थित्या उपदिष्टवार्तापरम्परया श्रुति......
5. -इ- तत्तदिति ।

ते ते हैतुकाः, हेतुः युक्तिः, युक्तिमात्रप्रधानाः[1] वेद्प्रमाणविधुराः बाह्यकुदृष्टिमतस्थाः हैतुका एव हेतवः [2]प्रवर्तका यस्य हैतुककल्पित इत्यर्थः। तर्केन्द्रजालक्रमे तर्को इन्द्रजालमिव तस्य क्रमो मार्गः तत्र कृतधियः शिक्षितबुद्धयः। [3]किञ्च इमे कथकप्रधाना इति गणनायां प्रस्तुतायां कनिष्ठिकाङ्गुलिगतां निष्ठां[4] बिभ्राणाः कनिष्ठिकया प्रथमं प्रथमं गणिता इत्यर्थः। किञ्च अध्यात्मश्रुतयः वेदान्ताः तत्सम्प्रदाया एव कतकानि पङ्कच्छेदकबीजानि तैरद्धा विशुद्धाशयाः, अद्धा निश्चयेन भृशं वा विशुद्धाशया आचार्याः[5] साध्यां पुरुषैः [6]सार्धयित्वात्(?) साध्योपायरूपां सिद्धोपायवशीक्रियां[7]साध्योपायौ भक्तिप्रपत्ती सिद्धोपायवशीकरणार्थौ इति नः शिष्यान् [8]सम्यगध्यापितवन्तः उपदिष्टवन्त इत्यर्थः ॥ ५३ ॥

## ॥ प्रभावव्यवस्थाधिकारः पञ्चविंशः ॥

अथ उपायप्रभावव्यवस्थाधिकारपद्ययोराद्येन पद्येन भगवत्स्वरूपादिकं यथा श्रुत्यादिभिः[9] अवसेयं तथा भागवतानां तदाश्रयणादेश्च महिमा श्रुत्यादिभिरेव पूर्वाचार्यैर्निश्चित इत्याह[10]—

**स्वरूपं यद्यादृग्गुणविभवलीलादि च विभोः**
**तदाज्ञासेतुश्च श्रुतिभिरवसेयं तदखिलम् ।**

---

1. -नाः हेतुकाः
2. प्रवृत्तिकाः
3. किञ्च कनिष्ठाश्रयां कनिष्ठिकाङ्गुलिगतां कथकप्रधानगणनानिष्ठां इमे कथक—
4. निष्ठां गणनानिष्ठामित्यर्थः
5. -र्याः वादिहंसाम्बुदाभिधाः
6. साधनीयत्वात् साध्यो-
7. -क्रियामिति
8. -न् समध्यापयन् सम्यग्—
9. -दिभिरुपेयं तथा
10. -ह- स्वरूपमिति

**तथा तद्भक्तानां तदुपसदनादेश्च महिमा**
**यथाधीतं सद्भिर्यतिपतिमुखैरध्यवसितः ॥ ५४ ॥**

विभोः भगवतः स्वरूपं यत् यदात्मकं[1], यादृक् यत्स्वभावकं, गुणाः ज्ञानबलै[2]श्वर्यादयः, विभवाः विभूतयः[3], लीला जगद्व्यापारादिः, आदिशब्देन विग्रहादिः गृह्यते । [4]तस्य भगवतः आज्ञा विधिनिषेधरूपा, सैव सेतुः, तदखिलं यथा श्रुतिभिः एवावसेयम् तथा तद्भक्तानां तदाश्रितानां तेषां समाश्रयणादेश्च, आदिशब्देन तत्कैङ्कर्यं विवक्षितम् । यतिपतिमुखैः सद्भिः यथाधीतमधीतमनतिक्रम्य [5]अध्यवसितः निश्चितः ।

व्याख्यान्तरे—श्रुतिभिर्वेदान्तैरवसेयं व्यवस्थाप्यम् । तथाहि—ईश्वरस्वरूपादिवत् तत्तद्भक्तानां अनन्तगरुडविष्वक्सेनादीनां तस्य भगवतः उपसदनादेश्च, महिमा प्रभावः सद्भिः सकलप्रभावज्ञैः भगवद्भागवतादिप्रभावज्ञैः इति यावत् । यतिपतिमुखैराचार्यैः यथाधीतं गुरूपदिष्टमनतिक्रम्य अध्यवसितः व्यवस्थापितः ॥ ५४ ॥

अथ उपायप्रभावव्यवस्थाधिकारान्ति[6]मेन पद्येन कलियुगेऽपि स्वधर्मनिरताः [7]नस्सहवासयोग्याः सन्तीत्याह[8]—

**चातुर्वर्ण्यचतुर्विधाश्रममुखे भेदे यथावस्थिते**
**(सक्तं)[वृत्तं] तन्नियतं गुणानुगुणया वृत्त्या विशिष्टं श्रिताः ।**

---

1. यत्स्वभाविकगुणविभवलीलादि च गुणाः
2. सम्यग्ज्ञानबलैश्वर्यादयश्च
3. च added
4. तदाज्ञासेतुश्च तस्य आज्ञासेतुश्च नित्यनैमित्तिकाः धर्माः कर्तव्यत्वेनानुशिष्टाः अकृत्यकरणादयश्च धर्माधर्मावित्यर्थः एवं तदखिलं......
5. अधीयमानमाश्रित्य अनुसारेणेत्यर्थः अध्यवसितः महिमा निश्चितः ॥ 54 ॥
6. -स्थाधिकारपद्ययोः अन्तिमपद्येन
7. एकान्तिनः नस्सह
8. -ह- चातुर्वर्ण्येति ।

त्यागोपप्लवनित्यदूरशरणव्रज्याविधौ कोविदाः
चिन्तामभ्युपगन्तुमन्तिमयुगेऽप्येकान्तिनस्सन्ति नः ॥ ५५ ॥

चत्वारो वर्णाः चातुर्वर्ण्यं, स्वार्थे ष्यञ् । ब्राह्मणादयः, चतुर्विधाश्रमाः ब्रह्मचर्यादयः, मुखशब्देन कुलगोत्रादयः [1]पुरोभूतत्वपश्चाद्भूतत्वादि च । चातुर्वर्ण्यादिभेदे यथावस्थिते यथापूर्वमवस्थिते सति [2]तन्नियतं वृत्तं तत्तद्वर्णाश्रमकुलादिनियतं आचारं, पुनः कीदृशं [3]गुणाः प्रपन्नत्वादयः तदनुगुणया वृत्त्या [4]वैष्णवविशेषाचारेण विशिष्टं[5] श्रिताः, [6]त्यागः स्वधर्मत्यागः, यद्वा परिकरत्यागः स एवोपप्लवः तैर्नित्यदूरा तद्गन्धरहितेत्यर्थः, तस्यां शरण[7]प्रज्ञायां [8]शरणागतविधौ कोविदाः एकान्तिनः भगवति पारमैकान्त्यं गताः भागवताः चिन्तामभ्युपगन्तुं भगवद्विषयचिन्तामङ्गीकर्तुं, भगवद्गुणानुभवचिन्तने सहायभूतां इत्यर्थः । सन्ति [9]अपिशब्देन इह तादृशाधिकारिणो दुर्लभाः, तेषां कार्तयुगधर्मावलम्बत्वात्, अथापि पञ्चषाः सन्तीति भावः ॥ ५५ ॥

## ॥ प्रभावरक्षाधिकारः षड्विंशः ॥

उपायप्रभावरक्षाधिकारपद्ययोराद्येन पद्येन उपायप्रभावं दर्शयन् उपाय-

---

1. पुरश्चूडत्वं पश्चाच्चूडत्वादि च चातु-
2. सन्नियतं
3. गुणानुगुणया वृत्त्या गुणाः
4. -त्त्या विशिष्टं वै-
5. विशिष्टा श्रि-
6. त्यागोपप्लवनित्यदूरशरणव्रज्याविधौ त्या-
7. शरणव्रज्यायां
8. शरणागतौ कोविदाः
9. अन्तिमयुगेऽपीति

[1]प्रभावतोऽचेतनानामपि तादृशविचित्र[2]महिमा सम्भवेत्, चेतनानां भगवत्परिग्रह आश्चर्य[3]महिमासम्भवः कैमुतिकन्यायसिद्ध इत्यभिप्रेत्याह[4]—

शिलादेस्स्त्रीत्वादिर्विपरिणतिरस्त्वद्भुतमिदं
ततोऽप्येतच्चित्रं यदुत दहनस्यैव हिमता ।
तृणस्यैवास्त्रत्वं रिपुषु निहतेरेव हितता
पदत्रेणैवेह त्रिभुवनपरित्राणमिति च ॥ ५६ ॥

शिलादेः आदिशब्देन शान्ताङ्गारबृन्दावनादिः गृह्यते । स्त्रीत्वादिरित्यत्रादिशब्देन [5]पुंस्त्वनन्दनत्वादिः । उपायभूतभगवत्पादारविन्दसंसर्गात् शिलायाः कस्याश्चित् स्त्रीत्वमभवत् । शान्ताङ्गारस्य पुंस्त्वं परीक्षित्त्वमभवत् । तथा बृन्दावनस्य नन्दनत्वमभवत्[6] । इदमद्भुतमस्तु । ततोऽप्येतद्वक्ष्यमाणमाश्चर्यं भवति । यदुत यच्च, दहनस्यैव हिमता, लङ्कायां हनुमद्वालधिवह्नेः शीतत्वं "शीतो भव हनूमतः" इति सीतायाः अनुग्रहात् । किञ्च तृणस्यैवास्त्रत्वं, तृणस्य केवलस्य ब्रह्मास्त्रत्वं जातं, रामपरिग्रहात् । रिपुषु खररावणादिषु निहतेः हननस्यैव हितत्वं जातं, [7]अन्यकर्तृकं हननं दुःखावहम् । सर्वत्र एवकारप्रयोगः दहनादेः प्राकृतत्व[8]सूचनाय । तथा पदत्रेणैव त्रिभुवनरक्षणं अयोध्यायां रामवनवासकाले [9]कृतम् ॥ ५६ ॥

---

1. -प्रभावः ते चेतना-
2. महिमसम्भवे चेत-
3. महिमसम्भवः
4. -ह-शिलादेरिति ।
5. पुंस्त्वानन्दनवनादि
6. तत्र लतौषधीनामपि मुक्तिरभवत् इति यत् तत् इदमस्तु अद्भुतमेव ।
7. अन्यत्र कर्तृकं हननं दुःखाय । सर्वत्र
8. -प्राकृतत्वास्त्ररचनाय तथा । पद......
9. कृतं इदमपि महदाश्चर्यम् । लौकिकदृष्ट्या शिलादीनां एषामपि तामेवाश्चर्यं ?-रूपातिशयो यथा भगवत्परिग्रहादासीत्, तथा चेतनानां भगवत्परिग्रहे आश्चर्यरूपो महिमा जायते । इति कैमुतिकन्यायसिद्धमिति भावः ॥ 56 ॥

[1]अथान्तिमेन पद्येन यत्परिगृहीतप्रपत्तिप्रभावो [2]लोकातीतः तादृशस्य प्रपन्नस्य महिमा वेदवाचामगोचर इत्याह[3]—

रागद्वेषमदाधिकैरिह महारक्षोभिरक्षोभितं
नित्ये रक्षितरि स्थिते निजभरन्यासाभिधानं तपः ।
यत्कक्षीकृतमत्यशेत विविधान् धर्मानधर्मद्रुहः
तद्भूमार्णवलेशवर्णनमपि प्राचां न वाचां पदम् ॥ ५७ ॥

[4]स्थित इत्यधिकप्रयोगात् नित्यस्य रक्षितुः महिमा[5] तिष्ठतु तावत्, तद्वशीकरणरूपो यः प्रपत्तेः प्रभावः श्रूयतामिति भावस्सूच्यते । [6]सर्वथा रक्षणोद्युक्ते भगवति भरन्यासाख्यं[7] तपः कीदृशं, [8]रागः प्राकृताभिलाषः, तदलाभे द्वेषः, तल्लाभे मदः, आदिशब्देन मोहादिः गृह्यते, त एव रक्षांसि, सर्वजगत्क्षोभणात्, तदिहास्मिन् प्रपन्ने अक्षोभितं क्षोभमप्राप्तं, कामक्रोधादिषु क्रियमाणेष्वपि प्रपत्तेरन[9]पायात्, अन्यत्तपः क्रोधादिभिः क्षरति, [10]येन प्रपन्नेन, कक्षीकृतमङ्गीकृतं सत् अधर्मद्रुहः अधर्मनाशकान् विविधान् धर्मान् सत्यं तपो दमश्शमो दान[11]मित्यादिकानत्यशेत अतिक्रान्तमभूत् । स्वप्रभावतः विषयप्रभावाच्च [12]तस्य प्रपन्नस्य भूमार्णवः

---

1. अथोपायप्रभावाधिकारपद्ययोरन्तिमेन
2. -तः मत्कर्तुः? प्रपन्नस्य
3. -ह-रागेति ।
4. नित्ये रक्षितरि स्थिते स्थित-
5. -मा निष्कर्षात् तावत् तद्वशीकरणरूपायाः
6. नित्यरक्षके सर्वदा
7. -न्यासाभिधानं तपः भरन्यासरूपं तपः भरन्यासाख्यं तपः "तस्मान्न्यासमेषां तपसामतिरिक्तमाहुः" इत्युक्तः कीदृशं
8. रागद्वेषेति प्रकृतिविषयाभिलाषः तद-
9. अनपायन्
10. यत् कक्षीकृतमयेन ? प्रपन्नेन अङ्गीकृतमसत् अधर्म-
11. -मित्यादीन् अत्यशेत ।
12. तद्भूमार्णवलेशवर्णनमपि तस्य

महिमसमुद्रस्तस्यैकदेशवर्णनमपि प्राचां वाचां वेदवाचां[1] परमगोचरं भवति ॥ ५७ ॥

[॥ स्थिरीकरणभागो द्वितीयः समाप्तः[2]]

—: * :—

## ॥ मूलमन्त्राधिकारः सप्तविंशः ॥

[3]मूलमन्त्राधिकारपद्ययोराद्येन पद्येन आचार्योपदिष्टं मूलमन्त्रं सार्थमनुसन्दधतां भरन्यासमङ्गीकुर्वन् देवः क्षिप्रं मोक्षप्रतिबन्धकसर्वपापविनिर्मोचनं करोतीत्याह[4]—

तारं पूर्वं तदनु हृदयं तच्च नारायणाये-
त्याम्नायोक्तं पदमवयतां सार्थमाचार्यदत्तम् ।
अङ्गीकुर्वन्नलसमनसामात्मरक्षाभरं नः
क्षिप्रं देवः क्षिपतु निखिलान् किङ्करैश्वर्यविघ्नान् ॥ ५८ ॥

तारं प्रणवं पूर्वपदं, [5]तदनन्तरं हृदयं, नमःपदं हृदयशब्देनाभिधीयते, तदनन्तरं "नारायणायेत्युपरिष्टादि"त्युक्तम् । तच्च नारायणायेति [6]पदं, पदत्रयात्मकं मूलमन्त्रमित्यर्थः ।

---

1. -चां न पदं अगोचरं भवति । "तस्यैवं विदुषः" "ब्राह्मणो विद्वानभिजयति," "ब्राह्मणो वै सर्वा देवताः," "एतद्वै देवाः प्रत्यक्षं यत् ब्राह्मणाः" इत्यादीनाम् ॥ 57 ॥
2. Chapter's subheading from the Rahasyatrayasara.
3. अथ पदवाक्ययोजनात्मके तृतीये भागे मूल-
4. -ह-तारमिति ।
5. तदनु तदन-
6. -येति पञ्चपदत्रया-

सार्थं यथा तथा[1] अवयतां अनुसन्दधतां अलसमनसां उपायान्तरे[2]ऽप्यशक्तमनसां नः आत्मरक्षाभरं[3] अङ्गीकुर्वन्, देवो नारायणः[4] निखिलान् किङ्करैश्वर्यस्य परमपदे क्रियमाणकैङ्कर्यसाम्राज्यस्य विघ्नान् प्रतिबन्धकानि सर्वपापानि क्षिप्रं एतद्देहावसान एव निरस्यति वर्तमानसामीप्ये वर्तमानप्रयोगः ।

व्याख्यान्तरे—आचार्यदत्तं सदाचार्योपदिष्टं पूर्वं मन्त्रस्य प्रथमपदभूतं तारयतीति तारं संसारोत्तारकं प्रणवं तदनु ततः पश्चादाचार्योपदिष्टं हृदयं मन्त्रस्य प्रथमभूतं नमः पदं "मन्त्रस्य हृदयं नम" इत्यभियुक्ताः । आम्नायोक्तं वेदान्तप्रतिपादितं तन्नारायणायेति पदं च सार्थमवयतामनुसन्दधतां अलसमनसां मन्दबुद्धीनां, अनेन उपासनापेक्षया प्रपन्नस्य विलक्षणाधिकारः सूचितः । नः अस्माकमात्मरक्षाभरं अङ्गीकुर्वन्, स्वीकुर्वन्, वेदः निखिलान् किङ्करैश्वर्यविघ्नान् कैङ्कर्याख्या पुरुषार्थप्रतिबन्धकदुरितानि क्षिप्रं शीघ्रं क्षिपतु क्षिप्रमित्यनेन विलम्बितफलभाजामुपासकानां व्यावृत्तिः ॥ ५८ ॥

[5]अथान्तिमेन पद्येन [6]ज्ञातव्यार्थत्रयप्रकाशकैः त्रिभिः पदैः सङ्घटितो मूलमन्त्रः अनुसन्दधतामवश्यं संसारनिवर्तको भवतीत्याह[7]—

इत्थं सङ्घटितः पदैस्त्रिभिरसावेकद्विपञ्चाक्षरैः
अर्थैस्तत्त्वहितप्रयोजनमयैरध्यात्मसारैस्त्रिभिः ।
आद्यत्र्यक्षरवेदसूतिरजहत्स्थूलादिवृत्तित्रयः
त्रैगुण्यप्रशमं प्रयच्छति सतां त्रय्यन्तसारो मनुः ॥ ५९ ॥

---

1. -तथा आचार्योपदिष्टं अवयतां
2. उपायान्तरेषु अशक्तानां
3. -रक्षाभरन्यासं
4. -णः नः नि-
5. अथ मूलमन्त्राधिकारान्ति-
6. ज्ञातस्यार्थत्रय-
7. -ह-इत्थमिति ।

इत्थमुक्तप्रकारेण एकद्विपञ्चाक्षरैः "ओमित्येकाक्षरं" "नम इति द्वे अक्षरे" "नारायणायेति पञ्चाक्षराणि" इत्युक्तैः, एकाक्षरद्व्यक्षरपञ्चाक्षररूपैः त्रिभिः पदैः तथाऽध्यात्मसारैः वेदान्तशास्त्रसारभूतैः तत्त्वहितप्रयोजनमयैः, तत्त्वं शारीरकाध्यायद्वयोक्तं आत्मस्वरूपं, हितं तृतीयाध्यायोक्तोपायविशेषः, प्रयोजनं चतुर्थाध्यायोक्तं अर्चिरादिगत्या भगवदनुभवरूपं तत्स्वरूपैस्त्रिभिरर्थैः यथाक्रमं पदत्रयोक्तैः सङ्घटितः सम्यङ्निबद्धः। किञ्च आद्यैस्त्र्यक्षरैः अकारोकारमकारैः, तद्द्वारेत्यर्थः। वेदानामृगादीनां त्रयाणां प्रसवभूः। यद्वा आद्यानि त्र्यक्षराणि वेदसूतयः[1] यस्य सः। अजहत् अत्यन्तं स्थूलादि वृत्तित्रयं येन सः स्थूलयोजना सूक्ष्मयोजना परयोजनाख्या वृत्तयः तिस्र उक्ताः। यद्वा स्वरूपरूपोपायफलयोजना-काले वेदान्तसारभूतोऽसौ मनुर्मूलमन्त्रः सतामलसानामस्माकं त्रैगुण्यस्य सत्त्वादि-गुणत्रयस्य, यद्वा, त्रैगुण्यशब्देन प्रकृतिर्लक्ष्यते तदाश्रयाया [2]द्यस्या देहेन्द्रियादि-रूपायाः प्रशमं मोक्षं प्रयच्छति। मोक्षे भगवदनुभवपरिपूर्णकैङ्कर्यप्राप्तिस्स्वतस्सिद्धेति भावः ॥ ५९ ॥

॥ द्वयाधिकारोऽष्टाविंशः ॥

अथ द्वयाधिकारपद्ययोराद्येन पद्येन द्वयमन्त्रप्रभावं दर्शयति[3]—

आकर्णितो वितनुते कृतकृत्य(र)[क]क्ष्यां
आम्रेडितो दिशति यश्च कृतार्थभावम् ।
प्रत्यूषतां भजति संसृतिकालरात्रेः
पद्मासहायशरणागतिमन्त्र एषः ॥ ६० ॥

---

1. सूक्तयः
2. -याः तस्याः
3. -ति-आकर्णित इति ।

[1]यः आकर्णितः आचार्योपदेशात् केनचित्[2] कर्णेन गृहीतश्चेत् तस्य [3]कृतकृत्य(र)[क]क्ष्यां कृतं कृत्यमुपायानुष्ठानं येन[4] तत्त्वमनुष्ठितोपायत्वं वितनुते आपादयति, [5]यश्च आम्रेडितः, द्विस्त्रिरुक्तश्चेत् तस्य [6]कृतः अर्थः कैङ्कर्यरूपः येन तत् तां अनुष्ठितकैङ्कर्यतां दिशति प्रयच्छति । [7]एष पद्मासहाये[8] भगवति शरणागतेरुपकारभूतो मन्त्रः द्वयाख्यो मन्त्रः, संसृतिरेव कालरात्रिः तस्याः प्रत्यूषतां निवर्तकतां इत्यर्थः । भजति ।

व्याख्यान्तरे— कृतकृत्येषु प्रपन्नेषु कक्ष्यामन्तर्भावम् ॥ ६० ॥

[9]अथान्तिमेन पद्येन द्वयमन्त्रं स्तौति[10]—

एकं द्वयं त्र्यवयवं सुखलभ्यतुर्यं
त्यक्तार्थपञ्चकमुपात्तषडङ्गयोगम् ।
सप्तार्णवीमहिमवद्द्विवृताष्टवर्णं
रङ्गे सतामिह रसं नवमं प्रसूते ॥ ६१ ॥

---

1. पद्मासहाये भगवति शरणागतेरुपकारभूतोऽयं मन्त्रः द्वयाख्यो मन्त्रः आकर्णितः आचार्योप-
2. -चित् स आकर्णितः
3. कृतकृत्यतां
4. स त्वनु-
5. च मन्त्रः आम्रे-
6. कृतार्थतां कृतः
7. स एषः
8. सहायशरणागतिमन्त्रः संसृतिरेव कालरात्रिः तस्याः प्रत्यूषतां प्रातस्तां निवर्तकतामित्यर्थः ॥ 60 ॥
9. द्वयाधिकारद्वितीयेन पद्येन
10. -ति-एकमिति ।

[1]एकं एकमन्त्रात्मकं, यद्वा अद्वितीय[2]म् । उपायोपेयरूपार्थद्वयप्रतिपादनात् द्वयमिति प्रसिद्धम्, यद्वा खण्डद्वयात्मकम् । त्र्यवयवं [3]अवयवत्रययुक्तं, सुखलभ्य-तुर्यं, तुर्यः धर्मार्थकाममोक्षाणां मध्ये चतुर्थः पुरुषार्थः सुखेन लभ्यः तुर्यः मोक्षो येन तत्, व्यक्तार्थपञ्चकं स्फुटमर्थपञ्चकं यत्र तत्, तथाहि–श्रीमन्नारायणचरणाविति प्राप्यस्वरूपं व्यक्तं, "शरणं प्रपद्य" इत्यन्त्योपायः, उत्तमपुरुषेण प्राप्ता च, श्रीमते नारायणायेत्यत्र फलं, नम इत्यत्र विरोधि च व्यक्तम् । उपात्तषडङ्गयोगं षडङ्गानि आनुकूल्यसङ्कल्पादीनि । अत्र अङ्गिना सह षडङ्गनिर्देशः "न्यासः पञ्चाङ्गसंयुत" इत्युक्तेः, उपात्तः स्वीकृतः [4]षडङ्गरूपो भरन्यासरूपः उपायः येन तत् । किञ्च सप्तार्णवीमहिमवत् सप्तानामर्णवानां समाहारः, [5]तद्वत् अपरिच्छेद्यमहिमवत् । विवृताष्टवर्णं विवृतो व्याख्यातः अष्टवर्णात्मको मूलमन्त्रः येन तत् । द्वयं शरणागति-मन्त्रः । इह अस्मिन् रङ्गे सतां[6], रङ्गस्थाने स्थितानां खलु शृङ्गाररसाद्यनुभवः, उपलक्षणमेतत्, श्रीवैष्णवक्षेत्रवर्तिनां श्रीवैष्णवानामस्माकं नवमं रसं शान्तिं प्रसूते[7] । मोक्षस्या(पि)[वि] दूरं सर्वस्वमनुसन्दधतां विषयविरागलक्षणां शान्तिं जनयत्यवश्य-मित्यर्थः ॥ ६१ ॥

[8]द्वयोच्चारणात्परं मोक्षे उपायान्तरं नास्तीत्यत्र बहून् दृष्टान्तान् दर्शयति[9]—

---

1. एकं मन्त्रं एक-
2. -यं द्वयम् उपा-
3. अवय(वा)[वा अवा]न्तरवाक्यानि अवय(वा)[वावा]न्तरवाक्यत्र(यं)[य] युक्तं सु—
4. –ङ्गयोगो
5. सप्तार्णवी त-
6. –तां वेषार्थं रङ्गपदग्रहणं रङ्ग-
7. -ते । शान्तिस्तु मोक्षस्य अविदूरंपन्थाः सर्वस्वमनु-
8. अथान्तिमेन पद्येन द्वयो-
9. -ति-न वेदान्तादिति ।

न वेदान्ताच्छास्त्रं न मधुमथनात्तत्त्वमधिकं
न तद्भक्तात्तीर्थं न तदभिमतात्सात्त्विकपदम् ।
न सत्त्वादारोग्यं न बुधभजनाद्बोधजनकं
न मुक्तेः सौख्यं न द्वयवचनतः क्षेमकरणम् ॥ ६२ ॥

यथा वेदान्तात् परं शास्त्रं नास्ति, यथा च मधुमथनात्केशवात् अधिकं तत्त्वं परदेवता नास्ति, यथोक्तं—"सत्यं सत्यं पुनस्सत्यं उद्धृत्य भुजमुच्यते । वेदशास्त्रात् परं नास्ति न दैवं केशवात्परम्" ॥ इति ।

न तद्भक्तात्तीर्थं यथा च तस्य भगवतो भक्तादाश्रितात् अधिकं [1]तीर्थं नास्ति, [यथा] "भवद्विधा भागवताः तीर्थीभूताः स्वयं प्रभो । तीर्थीकुर्वन्ति तीर्थानि स्वान्तस्थेन गदाभृता[2]" ॥ इति । "न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः । ते पुनन्त्युरुकालेन दर्शनादेव साधवः" ॥ इत्यादि, न तदभिमतात् सात्त्विकपदं यथा च[3] तेषां भागवतानां [4]अभिमतादेशादधिकं सात्त्विकं[5]सत्त्वगुणकं क्षेत्रं नास्ति "सा[6]काशीति न चाकशीतीत्याद्युक्तेः," न सत्त्वादारोग्यं सत्त्वगुणादारोग्यं[7] परं आत्मनो नास्ति, शारीरमारोग्यमात्मनः आरोग्याभावादौपचारिकम्, सत्त्वगुणप्रादुर्भावे पुंसां संसाररोगस्य नाशात् सत्त्वमेवोत्कृष्टमारोग्यम्, यथोक्तं "यत्तु शारीरमारोग्यमुच्यते [8]तस्मात् आत्मन आरोग्यं

---

1. तीर्थं अधिकं आत्मपरिशोधकं-
2. इति । "तिस्रः कोट्योऽर्धकोटी च तीर्थानि भुवनत्रये । वैष्णवाङ्घ्रिजलात्पुण्यात् कोटिभागेन नो समाः । न ह्यम्मयानि
3. च तदभिमतात् तेषां
4. -तात् तन्मनःप्रीतिविषयान्तर्भूतात् देशात्
5. गुणवर्धकं
6 सा काशीतीत्याद्युक्तेः । किञ्च न सत्त्वा-
7. -रोग्यं अधिकं परं
8. मुच्यते यदात्मनः

परं विदु"रिति, न बुधभजनाद्बोधजनकं, यथा च बुधानां विदुषां भजना[1]दधिकं, बोधजनकं नास्ति यथोक्तम्—"सदा सन्तोऽभिगन्तव्या यद्यप्युपदिशन्तु[2] नः। [3]याभिस्स्वैरकथास्तेषां उपदेशा भवन्ति ताः॥ सद्भिस्सहैव वक्तव्यं सदा ज्ञानार्थिभिर्नरैः। सत्सेवाया अभावे स्यात् नैतच्छास्त्रशतैरपि[4]"॥ [इति], न मुक्तेस्सौख्यं, यथा च—न[5]? मोक्षादधिकं सौख्यं नास्ति, यथोक्तम्—"न पारमेष्ठ्यं न रसाधिपत्य"मिति। "यच्चैश्वर्यकृतं सौख्यं यच्च कैवल्यजं सुखम्। तत्सर्वं भगवत्प्राप्तेः सुखलेशेन नो समम्"॥ इति, तथा द्वयवचनतः क्षेमकरणं, द्वयोच्चारणादधिकं, क्षेमकरणं क्षेमो मोक्षरूपः करणमुपायः मोक्षोपायः नास्ति। द्वयोच्चारणं प्रपत्तेरप्युपलक्षणं किंपुनर्न्यायसिद्धम्। यथोक्तम्—"सत्कर्मनिरताः शुद्धाः सांख्ययोगविदस्तथा। नार्हन्ति शरणस्थस्य कलां कोटितमीमपि"॥ इति॥ ६२॥

## ॥ चरमश्लोकाधिकार एकोनत्रिंशः॥

अथ चरमश्लोकादि[6]पद्येष्वाद्येन पद्येन भगवतो वशीकरणविशेषेण भगवन्तं प्रपद्य[7] निर्भरेण भवितव्यमितीममर्थं स्वानुसन्धानमुखेन दर्शयति[8]—

य उपनिषदामन्ते यस्मादनन्तदयाम्बुधे-
स्त्रुटितजनताशोकः श्लोकस्स्वयं समजायत।

---

1. -दधिकं बोधं बोधजनकं नास्ति बोधकश(ब्दे)[ब्दो] नपुंसकलिङ्गोऽप्यस्ति इति अनेन ज्ञायते। [अनया व्याख्यया "न बुधभजनात् बोधमधिकं" इति पाठ उन्नीयते]
2. उपदिशन्ति नः।
3. या हि स्वैरकथा—
4. -पि इत्यादि।
5. न omitted
6. -काधिकारपद्येषु
7. प्रपद्ये
8. -ति-य इति।

तमिह विधिना कृष्णं धर्मं प्रपद्य सनातनं
शमितदुरिताश्शङ्कातङ्कत्यजस्सुखमास्महे ॥ ६३ ॥

यः कृष्णः उपनिषदामन्ते चरमभागे भवति प्रतिपाद्यत इत्यर्थः । उपनिषत्स्वप्यादौ कर्मसम्बन्धविधानादिकं ज्ञानाङ्गं क्वचित् प्रतिपाद्यत इति उपनिषदामन्त इत्युक्तम् । अनन्तदयाम्बुधेः परमकारुणिकात् कृष्णात् त्रुटितजनताशोकः त्रुटितो [1]विभिन्नः जनतायाः शोको येन[2] श्लोकः चरमः समजायत । अर्जुनप्रार्थनां विना अस्य शोकातिरेकं दृष्ट्वा भगवता स्वयमेवोक्तत्वात् । तं कृष्णं कीदृशं सनातनं धर्मं सिद्धोपायं "कृष्णं धर्मं सनातन" मित्युक्तेः । इह जगति जन्मनि वा विधिना व्रजेत्युक्तेन यद्वा शास्त्रोक्तप्रक्रियया[3] प्रपद्य शमितदुरिताः शान्तसर्वपापाः शङ्कातङ्कत्यजः फलविषये शङ्का[4]तङ्कविधुराः निःशङ्काः निर्भराश्च सन्तः सुखमासीना भवामः ॥ ६३ ॥

[5]अथ द्वितीयपद्येन दुष्करैरुपायान्तरैः शोचतां पुंसां सिद्धोपायभूतो भगवान् स्वयं स्ववशीकरणरूपं साध्योपायविशेषं व्यधत्तेत्याह[6]— ।

दुर्विज्ञानैर्नियमगहनैः दूरविश्रान्तिदेशैः
बालानर्हैर्बहुभिरयनैः शोचतां नः सुपन्थाः ।
निष्प्रत्यूहं निजपदमसौ नेतुकामस्स्वभूम्ना
सत्पाथेयं किमपि विदधे सारथिस्सर्वनेता ॥ ६४ ॥

---

1. विच्छिन्नो
2. सः added after येन
3. -या शरणं गत्वा प्रपद्य
4. -ङ्कारूपातङ्क-
5. अथ चरमश्लोकाधिकारद्वि-
6. -ह- दुर्विज्ञानैरिति ।

दुर्विज्ञानैः ज्ञातुमशक्यैः नियमतो गहनैः दुष्करैः [1]दूरः विलम्बितः विश्रान्तिदेशः मोक्षो येषां तैः । अत एव बालानर्हैः बालानामशक्यैः बहुभिरयनैः मार्गैः भक्त्यादिभिः दुःखितानां नः [2]सुपन्थाः सिद्धोपायभूतः सर्वनेता सर्वेश्वरः सारथिः श्रीकृष्णः निष्प्रत्यूहं निर्विलम्बमित्यर्थः । निजपदं नेतुकामस्सन् स्वभूम्ना [3]स्वस्याप्रतिहतज्ञानस्वरूपेण प्रभावेन सर्वार्हत्वसुकरत्वादिगुणविशिष्टं पथि योग्यं पाथेयं सच्च तत्पाथेयं च सतामलसानां वा पाथेयं प्रपदनरूपं विहितवान् ॥ ६४ ॥

[4]अथान्तिमेन पद्येन व्यासादयोऽपीदं प्रपदनं लौकिकवैदिकरूरेण द्विविधं निश्चितफलाविना [5]भावं जानन्तीत्याह—व्यासेति ।

व्यासाम्नायपयोधिकौस्तुभनिभं हृद्यं हरेरुत्तमं
श्लोकं केचन लोकवेदपदवीविश्वासितार्थं विदुः ।
येषामुक्तिषु मुक्तिसौधशिखासोपानपङ्क्तित्वमी
वैशम्पायनशौनकप्रभृतयः श्रेष्ठाः शिरःकम्पिनः ॥ ६५ ॥

केचन ऋषयः व्यासनारदपराशरभरद्वाजशाण्डिल्यादयः व्यासाम्नायपयोधेः "भारतः पञ्चमो वेद" इत्युक्तत्वात्, महाभारतोदधेः कौस्तुभनिभं कौस्तुभस्थानीयं तत्सारभूतमित्यर्थः । हृद्यं भगवतोऽभिमतं, यद्वा दौष्कर्याभावात् अलसादीनां मनोहरं, हरेः कृष्णस्य, उत्तमं श्लोकं गीताचरमश्लोकं, लोकवेदपदवीविश्वासितार्थं लौकिकपदव्यां वैदिकपदव्यां उभयत्रापि विश्वासितः विश्वासं प्रापितः निश्चितफलाविलम्बः अर्थः प्रपदनं यस्य तं, चरमश्लोकार्थो भरन्यासः [6]असन्दिग्ध-

---

1. दूरविश्रान्तिदेशैः दूरे स्थितो विलम्बितो विश्रान्तिदेशः फलं येषां अत एव
2. सुपन्थाः Omitted
3. -म्ना स्वबाहुल्यात् किमपि सर्वार्हत्वविशिष्टं सत्पाथेयं पथि योग्यं पाथेयं हितं च तत् पाथेयं च ।
4. अथ चरमश्लोकाधिकारान्त्यपद्येन
5. -भावमित्याह-व्यासेति ।
6. -न्यासो विश्वासितः

[1]फलाविलम्ब इत्येवं विदुः । लौकिकभरन्यासे सर्वत्र फलाविनाभावो दृश्यते । एवं वैदिकेऽपि द्रष्टव्यमिति । ते कीदृशा इत्यत आह—येषामित्यादि । येषां मुनीनामुक्तिषु वचनेषु कीदृशीषु[2] मुक्तिरेव सौधः तस्य विशिखा रथ्या तस्याः सोपानपङ्क्तिभूतासु[3] वैशम्पायनशौनकप्रभृतयः प्रभृतिशब्देन मैत्रयादिः गृह्यते । अमी जगत्प्रसिद्धाः मुनिश्रेष्ठाः शिरःकम्पिनो भवन्ति । अर्थस्वारस्यात् शिरःकम्पं कुर्वन्तीत्यर्थः । वैशम्पायनः व्यासशिष्यः, शौनको नारदशिष्यः, मैत्रेयः पराशरशिष्यः, ते चरमश्लोके विश्वासितार्थं विदुरित्यन्वयः ॥ ६५ ॥

[ [4]पदवाक्ययोजनाभागस्तृतीयस्समाप्तः ॥ ]

—:*:—

## ॥ आचार्यकृत्याधिकारः त्रिंशः ॥

[5]आचार्यकृत्याधिकार(पद्ययोरा)[पद्येषु आ] द्येन पद्येन आचार्यस्त्व[6]वसानकाले परीक्षाभिश्शोधिते पात्रे सत्त्वोत्तरदशायां सस्नेहं सम्प्रदायप्रदीपं प्रवर्तयेदित्याह—[अधिजिगमिषुरिति]

अधिजिगमिषुराद्यं धाम दिव्यं त्रिधाम्नः
श्रुतविविधपरीक्षशोधिते क्वापि पात्रे ।
अनघगुणदशायामाहितस्नेहमार्यः
प्रदिशति निरपायं सम्प्रदायप्रदीपम् ॥ ६६ ॥

---

1. -लाविनाभाव इत्ये-
2. -षु मुक्तीत्यादि मु-
3. -सु मोक्षपथिकासु इत्यर्थः
4. Chapter's Subheading from the Rahasvatrayasara.
5. एवं पदवाक्ययोजनारूपो भागस्तृतीयः उक्तः । अथ चतुर्थभागे आ-
6. -र्यस्स्वाव-

आर्यः आचार्यः, त्रिधाम्नो भगवतः त्रीणि धामानि सन्तीति "त्रिधामाऽहमिति स्मृत" इत्युक्तेः दिव्यमप्राकृतमाद्यं सर्वस्थानानां प्रथमं धाम वैकुण्ठस्थानं अधिजिगमिषुः प्राप्तुमिच्छुः यदा भवति ततः परं सम्प्रदायार्थं उपदिशेत् न ततः पूर्वं, यथा निक्षिप्तनिधिमन्तिमदशायां स्वकीयेभ्य उपदिशन्ति तद्वदित्यर्थदौर्लभ्यप्रकाशनाय । एवमुक्तं वस्तु यदा तादृशपात्रलाभः [1]तथोपदिशेदिति भावः । [2]श्रुताः श्रुतिभिः स्मृतिभिः प्रतिपादिताः विविधाः परीक्षाः, "तस्मै स विद्वानुपसन्नाय सम्यक् प्रशान्तचिन्ताय शमान्विताय" । "संवत्सरं तदर्धं वा मासत्रयमथापि वा । परीक्ष्य विविधोपायैः कृपया निस्पृहो वदेत्" ॥ इत्यादिभिरुक्ताः । एवं परीक्षाभिः सम्यक् शोधिते पात्रे योग्ये पुंसि अन्यत्र दीपपात्रे[3] अनघाः सत्त्वादिगुणाः यस्यां[4] तस्यां दशायां सत्त्वोत्तरदशायां, दशा वर्तिः तस्यां शुद्धस्वच्छगुणविशिष्टायां, आहितस्नेहं, निहितप्रेमसारमित्यर्थः । अन्यत्र निहिततैलं यथा भवति तथा । निरपायं नित्यं, यद्वा अपायाः अत्र यथा न भवन्ति तथा । सम्प्रदायः परम्परयोपदिष्टवेदान्तरहस्या [5]एव दीपः तमोनिवर्तनात् तं प्रदिशति उपदिशेदिति विधिरवगन्तव्यः । प्रोवाच तां ब्रह्मविद्यां तत्त्वतः, कृपया निःस्पृहो वदेदित्यादिवत् ॥ ६६ ॥

अथाचार्यकृत्याधिकारस्यान्तिमयोः पद्ययोः आद्येन पद्येन मूलमन्त्रस्य पदत्रयेण यथाक्रमप्रतिपाद्य तत्त्वहितपुरुषार्थाख्यं पारलौकिकं धनं शिष्यदायत्वेन दत्तवन्तोऽस्मदाचार्या इत्याह[6]—

---

1. तदोप–
2. श्रुतेत्यादि ।
3. -पात्रेत्यनघगुणदशायां
4. यस्य तद्दशा-
5. रहस्यार्थाः अतः एव
6. -ह-प्रत्येय इति ।

प्रत्येयस्तु विलक्षणः प्रकृतितो [1]ज्ञाता पतिस्तत्परः
तस्मिन्नात्मभरार्पणं हिततमं तच्छेषवृत्तिः फलम् ।
इत्थं तत्त्वहिते पुमर्थ इति नस्त्रेधा विभक्तं धनं
दायत्वेन दयाधनाः स्वयमदुर्दत्तात्मनां देशिकाः ॥ ६७ ॥

दयाधना देशिका अस्मदाचार्याः ज्ञाता चेतनः प्रकृतितो देहाद्विलक्षणः प्रत्येयः ज्ञातव्यः, पतिः सर्वेश्वरः [2]तस्मादपि परः विलक्षण इति ज्ञातव्यः । यथोक्तम्—"द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च । क्षरस्सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥ उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः" ॥ इति । "स कारणं करणाधिपाधिप" इति च [3]प्रणवाद्युपदर्शितः । तस्मिन् शेषिणि शेषवृत्तिः फलं कैङ्कर्यरूपं परमपुरुषार्थः इत्येवं तत्त्वं हितं च परमपुरुषार्थश्चेति [4]त्रिधा विभक्तं धनं दत्तात्मनां [5]न्यस्तभराणां न्यस्तमनसां वा अस्माकं दायत्वेन शिष्यांशत्वेन स्वयमेवादुः दत्तवन्तः ॥ ६७ ॥

[6]अथान्तिमेन पद्येन आचार्य एवं शिष्यान् शिक्षयति, स एव भगवदाज्ञापरिपालकः आत्मानं शिष्यं च रक्षति नान्य इत्याह[7]—

निरवधिदयादिव्योदन्वत्तरङ्गनिरङ्कुशैः
नियमयति यश्शिष्यान् शिक्षाक्रमैर्गुणसङ्क्रमैः ।

---

1. -तितस्त्राता in R. S.
2. तत्परः प्रत्येयोऽस्म[ा]दपि परविल-
3. प्रणवार्थो दर्शि-
4. त्रेधाविभक्तं
5. दत्तोऽन्यस्त आत्मा मनः स्वरूपमुपायैः तेषां स्वस्मिन्न्यस्तभराणां न्यस्तमनसां वा—
6. अथाचार्यकृत्याधिकारान्ति-
7. -ह-निरवधीत्यादि ।

अचरमगुरोराज्ञापारम्परीपरवानसौ
न परमिह तान् तल्लक्षेण स्वमप्यभिरक्षति ॥ ६८ ॥

य आचार्यः निरवधिको यो दयाक्षीरसमुद्रस्तत्तरङ्गभूतैः निरङ्कुशैरमोघैः इत्यर्थः । गुणानां [1]शमदमादिगुणानां, शमदमादिषु गुणानां सङ्क्रमो येषु तैः । शिक्षाक्रमैः शिक्षानुपूर्वीभिः शिक्षाप्रकारैरिति यावत् । शिष्यान् [2]शरणागतान् शिक्षयति शिक्षया साधुतां प्रतिपादयति । असावाचार्यः अचरमगुरोः प्रथमगुरोः भगवतः आज्ञापारम्परीपरवान् आज्ञापरम्परापरिपालको भवति । हेतुगर्भमिदं पदम् । [3]भरपा···· ···· ····प्रपन्नानां मध्य इति वा परं केवलं तान् शिष्यानेवाभिरक्षतीति न, किन्तु तल्लक्षेण शिष्यरक्षणव्याजेन तद्द्वारेणेत्यर्थः । स्वमात्मानमप्यभिरक्षति, स्वस्वरूपसिद्धिञ्च प्राप्नोतीत्यर्थः । रक्षणाभावे आचार्यकृत्यमेव हीयेतेति भावः ।

व्याख्यान्तरे—गुणानां आत्मगुणानां शेषत्वपारतन्त्र्यादीनां सङ्क्रमो येषु तैः आज्ञापारम्पर्याः आज्ञारूपश्रुतिस्मृतिसमूहस्य परवान् परतन्त्रः ॥ ६८ ॥

## ॥ शिष्यकृत्याधिकार एकत्रिंशः ॥

अथ शिष्यकृत्याधिकारपद्ययोराद्येन पद्येन गुणवतः शिष्यस्य कथमभिलषितार्थसिद्धिः न स्यात्, स्यादेवेत्याह[4]—

अशिथिलगुरुभक्तिः तत्प्रशंसादिशीलः
प्रचुरबहुमतिस्तद्वस्तुवास्त्वादिकेऽपि ।

---

1. सङ्क्रमैः शमादिगुणानां सोपानस्थानीयैः तद्धेतुभूतैरित्यर्थः । शिक्षाक्रमैः
2. शरणं गतान्
3. भगवदाज्ञापरिपालनात् इह जगति प्रपन्नानां
4. -इ- अशिथिलेति ।

गुणवति विनियोक्तुं गोपयन् सम्प्रदायं
कृतविदनघवृत्तिः किं न विन्देन्निधानम् ॥ ६९ ॥

"यस्य देवे परा भक्तिः यथा देवे तथा गुरौ" इत्युक्ता दृढा भक्तिः यस्य सः। [1]तस्याचार्यस्य [2]प्रशंसादि शीलं यस्य सः, प्रशंसा प्रख्यापनं "गुरुं प्रकाशयेद्धीमानि" त्युक्तेः। आदिशब्देन शुश्रूषादयः [3]तस्य वस्तु [4]तदाराध्य-देवपूजापुस्तकादि, तस्य वास्त्वादिकं तु गृहक्षेत्रपुत्रकलत्रशिष्यादिकं [5]तत्रापि प्रचुर-बहुमानः अत्यन्तभक्तियुक्त इत्यर्थः। [6]गुणवति विनियोक्तुं गोपयन् सम्प्रदायं स्वयमप्याचार्यवत् गुणवति पात्रे उपदेष्टुं सम्प्रदायार्थं असद्भ्यो गोपयन् अप्रकाशयन्, कृतवित् भगवत्याचार्ये च कृतज्ञः अनघवृत्तिः निरपायसदाचारतत्परः [7]सच्छिष्यः निधानं सर्वगुणसम्पन्नं ब्रह्म किं न विन्देत् विन्देदेव भगवदनुभवरूपं मोक्षं प्राप्नोत्येव, [8]सच्छिष्यस्य फलसिद्धौ न संशय इत्यर्थः।

व्याख्यान्तरे---अशिथिलगुरुभक्तिः सन्ततप्रवृद्धाचार्यभक्तिः तस्य गुरोः प्रशंसा गुणप्रकाशः आदिशब्देन तत्कैङ्कर्यमुच्यते, तदेव शीलं यस्य सः तस्याचार्यस्य वस्तु वसनाभरणादिरूपं, वास्तु गृहाः, तदादिके वस्तुनि प्रचुरबहुमतिः अतिशयितविश्वासः कृतवित् आचार्यकृतोपकारज्ञः अनघा निष्पापा वृत्तिः व्यापारः यस्य सः ॥ ६९ ॥

---

1. तत्प्रशंसादिशील:
2. प्रशंसादौ प्रशंसा
3. तेषु कर्तुं शीलं यस्य सः, किञ्च तद्वस्तुवास्त्वादिके तस्य
4. तदाराध्यं देव-
5. अपि omitted
6. किञ्च गुण—
7. -त्परः शिष्यः सत् शिष्टः
8. सत् शिष्टस्य

अथ शिष्यकृत्याधिकारान्तिमेन पद्येन सच्छिष्यस्य (आचार्यादधिकं देवता)-[आचार्यादधिका तस्य समा वा देवता अन्यास्तीति] चिन्तनमनुचितमिति इममर्थं स्वानुसन्धानमुखेन प्रकाशयति[1]—

**अध्यासीनतुरङ्गवक्त्रविलसज्जिह्वाग्रसिंहासना-**
**दाचार्यादिह देवतां समधिकामन्यां न मन्यामहे ।**
**यस्यासौ भजते कदाचिदजहद्भूमा स्वयं भूमिकां**
**मग्नानां भविनां भवार्णवसमुत्ताराय नारायणः ॥ ७० ॥**

[2]अध्यासीनेन नित्यवासिना तुरङ्गवक्त्रेण विलसत् प्रकाशमानं जिह्वाग्रमेव सिंहासनं यस्य तस्मात् शिष्योपदेशार्थं भगवदधिष्ठितजिह्वाग्रादित्यर्थः । एवंभूतात् सदाचार्यात् इह विभूतिद्वये समधिकां अन्यां देवतां न मन्यामहे । आचार्यादधिका देवता नास्तीति निश्चिनुमः, भगवानप्याचार्यादधिक इति शिष्यैर्न मन्तव्य [3]इत्युक्तम् । "यस्य देवे परा भक्तिः यथा देवे तथा गुरौ" इत्यत्राप्ययमेवार्थः । कुत इत्यत्राह— यस्येति । असौ[4] नारायणः अजहद्भूमा प्रकटितस्वमहिमा सन्नित्यर्थः । संसारार्णवमग्नानां भविनां संसारिणां [5]भवार्णवात् तेषां समुद्धरणार्थं कदाचित् योग्यकाले स्वयमेव[6] यस्याचार्यस्य भूमिकां, वेषं[7] आचार्यतामित्यर्थः,

---

1. -ति- अध्यासीनेति ।

2. सिंहासनमध्यासीनः तत्र सुप्रतिष्ठितो यस्तुरङ्गवक्त्रः हयग्रीवः तेन विलसत् दीप्यमानं जिह्वाग्रमेव सिंहासनं यस्य तस्मात् जिह्वाग्रसिंहासनारूढहयग्रीवादित्यर्थः । शिष्योपदे-

3. -क्तं भवति ।

4. सर्वाकारविशिष्टोऽपि नारायणः अजहन्महिमा सन् आचार्यत्वेऽपि प्रकटित-

5. संसारमहार्णवात्

6. -मेवास्य आचार्यस्य

7. वेषपरिग्रहं

"आचार्यः स हरिस्साक्षात् चररूपी न संशयः। मग्नानुद्धरते [1]लोकान् कारुण्याच्छास्त्रपाणिना ॥" इति[2] प्रमाणमनुसन्धेयं, भजते। तस्याचार्यस्य महिमा (वर्णितु) [वर्णयितु] मशक्य इति भावः ॥ ७० ॥

## ॥ निगमनाधिकारो द्वात्रिंशः ॥

[3]निगमनाधिकारपद्यानामाद्येन सहस्रेषु कश्चित्[4] आचार्यकटाक्षेणापगताज्ञानः सर्वज्ञत्वं प्रतिपद्य[5] सम्प्रदायार्थमसतः[6] परिहृत्य [7]सद्भ्यः शिष्येभ्यः प्रयच्छन् सदाचारपरः नित्यसूरिबृन्दैः परमपदे सदा पूज्यत इत्याह[8]—

**करबदरितविश्वः कश्चिदाचार्यदृष्ट्या**
**मुषितनिखिलमोहो मूलमन्त्रादिभोगः।**
**सगुणविषयसिद्धौ सम्प्रदायं प्रयच्छन्**
**सुचरितसिलहारी सूरिबृन्दाभिनन्द्यः ॥ ७१ ॥**

कश्चित् मनुष्याणां सहस्रेषु कश्चित्, भाग्यवान् आचार्यस्य दृष्ट्या "एकयैव गुरोः दृष्ट्या" इत्युक्तया प्रथमकटाक्षरूपया ज्ञानात्मिकया मांसरूपया प्रसिद्धया दृष्ट्या वा [9]मुषितः अपहृतः निखिलार्थविषयो [10]मोहः यस्य सः। अत एव

1. -ते देवः का-
2. इत्यादेः। भगवानपि यस्याचार्यस्य भावं तदाकारमयते (य)[त]स्याचार्यस्य महिमा
3. अथ निगमना-
4. भाग्यवान् आचार्य-
5. प्रतिपाद्य रहस्यत्रयार्थानुसन्धानतः सम्प्र-
6. असद्भ्यः
7. सत्शिष्येभ्यः
8. -ह-करबदरितेति।
9. मुषितनिखलमोहः मुषितो
10. मोहः अज्ञानान्यथाज्ञानविपरीतज्ञानरूपो यस्य सः अतः

करबदरितविश्वः करतलामलकवत् प्रत्यक्षीकृतं विश्वं [1]जगत् येन सः। अत एव मूलमन्त्रादीनां अर्थानुसन्धानमेव भोगः सुखानुभवो यस्य सः। सगुणविषयसिद्धौ सगुणो गुणविशिष्टः शिष्य[2]त्वौपयिकगुणसम्पन्नः, विषयः सच्छिष्य एव विषयः पात्रं तस्य सिद्धौ लाभे सति सम्प्रदायं[3] प्रयच्छन् उपदिशन् अनेन असद्भ्यो गोपनं [4]चोद्यते। तदर्थं सुचरितसिलहारी सुचरितान्येव सिलानि ततस्ततो विकीर्णानि धान्यानि "सुव्याहृतानि महतां सुकृतानि ततस्ततः। सञ्चरन् धीर आसीत सिलहारी सिलं यथा"॥ इत्युक्तप्रकारेण सच्छिष्योपदेशार्थं महतां सुव्याहृतानि[5] महतां सुकृतानि सदा(चाराणि)[चरणानि] ततस्सञ्चिन्वन् ततस्ततो [6]बुद्ध्या समाचरन्नित्यर्थः। एवं स्थितोऽसौ सच्छिष्यः सूरिबृन्दाभिनन्द्यो भवति [7]वर्तमानशरीरपातानन्तरं अर्चिरादिमार्गेण परमपदमुपेत्य तत्र सूरिबृन्दानां पूजनीयो भविष्यतीत्यर्थः[8]॥

---

1. -गत् सर्वं वा येन—
2. -त्वौपाधिकगुण-
3. -प्रदायगतमर्थं प्रयच्छन्
4. च द्योत्यते
5. -नि ततस्तत आर्जयन्
6. बुध्द्वा
7. नित्यानां सूरीणां मुक्तानां समूहैः अभिनन्द्यो भवति। वर्त-
8. -त्यर्थः। हरिः ओम्। शुभमस्तु। श्रीमते निगमान्तमहादेशिकाय नमः। हयग्रीवाय नमः। सारांशमेव परिगृह्णाति अनभ्यसूयः असूयाविशिष्टश्च तारतम्यमनादृत्य गृहीतग्राही भवति। अनसूयः सारांशभाक् भवति। सत्सम्प्रदायपरिशुद्धमनाः सदर्थी सारांशभाक्। अनेनैवंविधाः सारासारविवेकेन प्रभविष्यन्ति। सदर्थी सदसतो[:]सदंशार्थी सारमेव भजते, नेतरत्। अन्ये तु न तथा, सङ्केतभीतिरहिताः केचित् संकेचित् तं? कृत्वा तिष्ठन्ति कर्मवशात् सद्वासद्वा इदमेवास्माभिः परिपालनीयमिति, तदन्तर्भूताः केचन सात्त्विका अपि तद्भीताः तद(नि)[ति]वर्तितुं न शक्नुवन्ति। ये तु सङ्केतभीतिरहिताः ते सारांशभाजो भवन्ति। सतृणेष्वसक्तः सतृणानि तृणैस्समानि समानस्य सादेशः, क्षुद्राणि प्रयोजनानि ख्यातिलाभपूजादीनि त(त्र)[त्रा]सक्तः ख्यातिलाभपूजापराङ्मुखश्च सारांशभाक् भवति। ख्यातिपराणां लोकानुवर्तनप्राधान्यात् सारांशभाक्त्वं न घटते। एवंभूतो यो वर्तते, स सर्वोऽपि नाथयामुनयतिवरादिसिद्धान्तानुसारिणां

व्याख्यान्तरं—मूलमन्त्रः आदिः येषां ते मूलमन्त्रादयः आदिशब्देन द्वयचरमश्लोकयोः (स्पृहणं)[ग्रहणं] तदर्थानुभव एव भोगो यस्य सः ॥ ७१ ॥

[[1]अथ निगमनाधिकारान्तिमपद्ययोराद्येन पद्येन श्रीभगवदाचार्यपरमकृपया जन्मास्माकं सफलं, अतः परमपदप्राप्तये श्रीशेषिदिव्यदम्पत्योः संकल्पविशेषं प्रतीक्षमाणा वर्तामहे" इतीममर्थं स्वाश्रितानामपि स्ववृत्तिशिक्षणरूपेण सङ्ग्रहेण स्वावतारफलवैलक्षण्यं स्वमनोवृत्तिविशेषं च दर्शयति - निर्दिष्टमिति ।]

---

अस्माकं सद्वर्तिनीं सन्मार्गमनुविधास्यति अनुसरिष्यति अवश्यं परिग्रहीष्यति, साडम्बरैः किमपरैरिति भावः ॥ ७२ ॥

इति यतिराजमहानसपरिमलपरीवाहवासितां पिबत ।
विबुधपरिषन्निषेव्यां वेदान्तोदयनसम्प्रदायसुधाम् ॥
कलकण्ठगणास्वाद्ये कामस्यास्त्रे निजाङ्कुरे ।
निम्बवृत्तिभिरुद्गीर्णे न चूतः परितप्यते ॥
रहस्यत्रयसारोऽयं वेङ्कटेशविपश्चिता ।
शरण्यदम्पतिविदां सम्मतस्समगृह्यत ॥

॥ **निगमनाधिकारो द्वात्रिंशः** ॥

इत्थं वेदान्तगुरुभिर्दर्शितस्य यथामति ।
सङ्ग्रहस्याधिकाराणां व्याख्योक्ता तत्प्रसादतः ॥
श्रीभाष्यश्रीनिवासेन कौशिकान्वयजन्मना ।
सङ्ग्रहस्याधिकाराणां व्याख्येयं साधु निर्मिता ॥
अधिकारसङ्ग्रहकृते हृदयं नेतुं यथावदिह कश्चतुरः ।
श्रुतिगुप्तये गुणिनि के वयं समकारि तद्विवृतिरित्थमियम् ॥
क्षपयितुं क्षमते क्षमिणां वरो धिषणया धिषणां धिषणस्य यः ।
भजतु मे धिष(णां)[णा] धिषणाश्र(यः श्रु)[यश्रु]तिशिरोगुरुशेखरमन्वहम् ॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥
हरिः ओम् ॥ शुभमस्तु ॥ श्रीमते वेदान्तगुरवे नमः ॥

—: * :—

1. Collected from the commentaries of Rahasyatrayasara by the editer.

[1]निर्दिष्टं यतिसार्वभौमवचसामावृत्तिभिर्यौवनं
निर्धूतेतरपारतन्त्र्यनिरया नीताः सुखं वासराः ।
अङ्गीकृत्य सतां प्रसत्तिमसतां गर्वोऽपि निर्वापितः
शेषायुष्यपि शेषिदम्पतिदयादीक्षामुदीक्षामहे ॥ ७२ ॥

यतिसार्वभौमवचसामावृत्तिभिः यौवनं निर्दिष्टं न तु विषयान्तरैः, वासराः निराकृतः इतरपारतन्त्र्यमेव निरयः नरकविशेषो येषां ते, तद्भोक्तारस्सन्तः सुखं नीताः, सतां नाथयामुनप्रभृतीनां प्रसत्तिमनुग्रहं अङ्गीकृत्य शिरसा उद्वाह्य कुदृष्टीनां गर्वोऽपि निर्वापितः, शेषायुष्यपि शेषिणोरुभयविभूतिशेषिणोः दम्पत्योः श्रीश्रीनिवासयोः दयादीक्षां दयया कृतां मोक्षयिष्यामीति सङ्कल्परूपां दीक्षां उदीक्षामहे प्रेक्षमाणा भवामः ॥ ७२ ॥

[2]अथ स्वकीय[ग्रन्थ]स्य सात्त्विकेषु उपयोगं दर्शयति—[स्तोतुमिति ।]

स्तोतुं निन्दितुमस्मदुक्तिमथवासोढुं समूढं जगत्
किं नश्छिन्नमनन्तचिन्तनरसे सुस्थे परं तस्थुषाम् ।
शिष्याः शिक्षितबुद्धयः श्रुतिपथे येषां वयं ये च नः
तत्सन्तोषसमर्पणक्षममिदं साडम्बरैः किं परैः ॥ ७३ ॥

जगत् अस्मदुक्तिं स्तोतुं निन्दितुमसोढुं उपेक्षितुं समूढं भवति, सुस्थे सुस्थिरे देवेनाप्रकम्प्ये, अनन्तस्य ब्रह्मणश्चिन्तनं विचारः तदात्मके परं तस्थुषां नियमेन तिष्ठतां नः तावता किं छिन्नम् । श्रुतिपथे वेदमार्गे शिक्षितबुद्धयः वयं येषां शिष्याः ये च नः शिष्याः इदमस्मदुक्तं तेषां सन्तोषसमर्पणे क्षमं, साडम्बरैः कुतर्कवादिभिः परैः किं प्रयोजनम् ॥ ७३ ॥

---

1. निर्विष्टं in R.S.
2. अयं श्लोकः अधिकतया दृश्यते ।

उक्तमेवार्थं विविच्य दर्शयति—[आस्तिक्यवानिति ।]

**आस्तिक्यवान्निशितबुद्धिरनभ्यसूयुः**
**सत्सम्प्रदायपरिशुद्धमनास्सदर्थी ।**
**सङ्केतभीतिरहितः सतृणेष्वसक्त-**
**स्सद्वर्तनीमनुविधास्यति शाश्वतीं नः ॥ ७४ ॥**

आस्तिक्यवान् शास्त्रविश्वासशाली, निशितबुद्धिः श्रुतार्थधारणशक्तः, अन-भ्यसूयुः गुणदोषाविष्करणरहितः, सता श्रुतिस्मृत्यविरोधिना सम्प्रदायेन परिशुद्धमनाः निस्संशयहृदयः सदर्थी सद्धयः अर्थविशेषजिज्ञासुः, सङ्केतभीत्या रहितः, तृणेषु निस्सारग्रन्थेषु असक्तः, पुरुषो यः सः अविच्छिन्नसम्प्रदायां सद्वर्तनीं सन्मार्गं अनुविधास्यति अनुसरिष्यति ।

व्याख्यान्तरे—केचित्सङ्केतं कृत्वा तिष्ठन्ति कर्मवशात् सद्वा असद्वा इदमेवास्माभिः परिपालनीयमिति, तदन्तर्भूताः केचन सात्त्विका अपि तद्भीताः तदननुवर्तितुमशक्नुवन्ति । ये तु सङ्केतभीतिरहिताः ते सारांशभाजो भवन्ति । सतृणेष्वसक्तः सतृणानि तृणैस्समानानि समानस्य सादेशः, क्षुद्राणि प्रयोजकानि ख्यातिलाभपूजादीनि तत्रासक्तः, ख्यातिलाभपूजापराङ्मुखश्च सारांशभाक् भवति । ख्यातिपराणां लोकानुवर्तनप्राधान्यात् सारांशभाक्त्वं न घटते । एवंभूतो यो वर्तते स सर्वोऽपि शाश्वतीं नाथयामुनयतिवरादिसिद्धान्तानुसारिणां अस्माकं सद्वर्तनीं सन्मार्गं अनुविधास्यति अनुसरिष्यति परिग्रहीष्यतीति यावत् । साडम्बरैः किं परैरिति भावः ॥ ७४ ॥

**रहस्यत्रयसारोऽयं वेङ्कटे(न)[श]विपश्चिता ।**
**शरण्यदम्पतिविदां सम्मतस्समगृह्यत ॥ ७५ ॥**

॥ सम्प्रदायप्रक्रियाभागश्चतुर्थस्समाप्तः ॥

—: * :—

॥ [1]इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
[2]श्रीमदधिकारसङ्ग्रहः सम्पूर्णः ॥

—: * :—

इत्थं वेदान्तगुरुभिः दर्शितस्य यथामति ।
सङ्ग्रहस्याधिकाराणां व्याख्योक्ता तत्प्रसादतः ॥ ७६ ॥

श्रीभाष्यश्रीनिवासेन कौशिकान्वयजन्मना ।
सङ्ग्रहस्याधिकाराणां व्याख्येयं साधु निर्मिता ॥ ७७ ॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥ ७८ ॥

॥ हरिः ओम् ॥

॥ इति श्रीकुशिकसुतकुलजलधिराकासुधाकरेण
श्रीभाष्यश्रीनिवासाचार्येण श्रीवेदान्ताचार्यकरुणा-
वलम्बनेन विरचिता अधिकार-
सङ्ग्रहव्याख्या समाप्ता ॥

—: * :—

---

1. Colophon is added by the editer.
2. श्रीमद्रहस्यत्रयसाराधिकारसङ्ग्रहस्संपूर्णः in D. No. 5346 ms.

# विषयानुक्रमणी ॥


| | अधिकारः पृष्ठ | | अधिकारः पृष्ठ |
|---|---|---|---|
| 1. उपोद्घातः | 1 | शास्त्रीयनियमनाधिकारः | 17 - 47 |
| 2. मङ्गलश्लोकाः | 1 | अपराधपरिहाराधिकारः | 18 - 50 |
| 3. मङ्गलाचरणम् | 2 | स्थानविशेषाधिकारः | 19 - 52 |
| 4. गुरुपरम्परासारः | 3 | निर्याणाधिकारः | 20 - 54 |
| I अर्थानुशासनभागः प्रथमः | | गतिविशेषाधिकारः | 21 - 56 |
| उपोद्घाताधिकारः | 1 - 6 | परिपूर्णब्रह्मानुभवाधिकारः | 22 - 58 |
| सारनिष्कर्षाधिकारः | 2 - 9 | अर्थानुशासनभागानुक्रमश्लोकः | 61 |
| प्रधानप्रतितन्त्राधिकारः | 3 - 11 | II स्थिरीकरणभागो द्वितीयः | |
| अर्थपञ्चकाधिकारः | 4 - 15 | सिद्धोपायशोधनाधिकारः | 23 - 62 |
| तत्त्वत्रयचिन्तनाधिकारः | 5 - 18 | साध्योपायशोधनाधिकारः | 24 - 64 |
| परदेवतापारमार्थ्याधिकारः | 6 - 20 | उपायप्रभावव्यवस्थाधिकारः | 25 - 64 |
| मुमुक्षुत्वाधिकारः | 7 - 23 | उपायप्रभावरक्षाधिकारः | 26 - 68 |
| अधिकारिविभागाधिकारः | 8 - 25 | III पदवाक्ययोजनाभागः तृतीयः | |
| उपायविभागाधिकारः | 9 - 27 | मूलमन्त्राधिकारः | 27 - 71 |
| प्रपत्तियोग्याधिकारः | 10 - 30 | द्वयाधिकारः | 28 - 73 |
| परिकरविभागाधिकारः | 11 - 33 | चरमश्लोकाधिकारः | 29 - 77 |
| साङ्गप्रपदनाधिकारः | 12 - 34 | IV सम्प्रदायप्रक्रियाभागः चतुर्थः | |
| कृतकृत्याधिकारः | 13 - 36 | आचार्यकृत्याधिकारः | 30 - 80 |
| स्वनिष्ठाभिज्ञानाधिकारः | 14 - 38 | शिष्यकृत्याधिकारः | 31 - 83 |
| उत्तरकृत्याधिकारः | 15 - 41 | निगमनाधिकारः | 32 - 86 |
| पुरुषार्थकाष्ठाधिकारः | 16 - 44 | ग्रन्थोपयोगः | 89 |


—— : * : ——

శ్రీ

# తొలిపలుకు

## వస్తుగౌరవము

శ్రీ రాధామాధవులు భక్తి శృంగార రసాధిదేవతలు. వారి దివ్యనామములవలె వారి లీలలును మధురమధురములు. భక్తిభావ నిర్భరులగు భారతీయులు ఒకవంక నా పురాణదంపతుల చరితము నాదరించి, ప్రకృతిపురుషులని యారాధించి, యానందించి, తద్భక్తిని భవసాగర తరణోపాయముగఁ గీర్తించుచున్నారు. మఱొకవంక గోప కామినియగు రాధిక పరకీయ యనియును, గోపాలకృష్ణుఁడు విటశిఖా వతంసుఁ డనియును, వారి ప్రణయము దివ్య మనియును గొందఱు రసిక శిఖామణులు ఆరాధించుచున్నారు. ఈ భావవైవిధ్యము వెలిచూపు నకు విరోధముగఁ గనుపట్టినను, లోచూపునకుఁ బరమార్థప్రదమగు మధురభక్తివిశేషముగ నభిజ్ఞులకుఁ దోచకపోదు. శ్రీ మద్భాగవత ములో - ధర్మసంస్థాపనార్థ మవతరించిన శ్రీ కృష్ణుఁడు పరాంగనా సంగమమును గావించుట యధర్మము కాదా? యను పరీక్షితుని ప్రశ్నకు శ్రీశుకుల సమాధానమిట్లున్నది :

ఆ. గోపజనములందు, గోపికలందును,
సకలజంతులందు సంచరించు
నా మహాత్మునకుఁ బరాంగన లెవ్వరు?
సర్వమయుఁడు లీల సలిపెఁగాక! (భాగ, 10-1108)

రాధాకృష్ణుల పవిత్ర ప్రణయగాథ శ్రీమద్భాగవతమునఁ గానరాదు. దేవీభాగవత బ్రహ్మవైవర్త పురాణాదులందుఁ జూపట్టుచున్నది. భక్త

వతంసుఁడగు జయదేవకవి తన గీతగోవిందమను గీతిసాహితియందు ఆ రాధామాధవుల వివిధ శృంగార రసానుభూతులను సమంచితముగ సంతరించియున్నాఁడు.

ఆంధ్రసాహిత్యమునఁ దొలుతఁ గావ్యముఖమున రాధామాధవులను సంస్మరించిన ధన్యాత్ముఁడు, కవిసార్వభౌముఁడు * శ్రీనాథుఁడని, తెలియుచున్నది.

తరువాత రాధామాధవుల ప్రణయము నధికరించి పలువురు కవులు పలుకృతులను బహుభంగుల నవదరించియున్నారు. వానిలో-ఎడవల్లి వేంకటకవి ప్రణీతమగు రాధామాధవము అను మూఁడాశ్వాసముల శృంగారప్రబంధము ప్రకృతము ముద్రణభాగ్యము నందుచున్నది.

## కవి - కావ్యము

కవి యాఱువేల నియోగి వంశోత్పన్నుఁడు. హారితసగోత్రుఁడు. నిశ్శంక పదాంకితుఁడు. కిచ్చమంత్రికిని వేంగమాంబకును తనయుఁడు. హయగ్రీవోపాసకుఁడు. సంస్కృతాంధ్రములయందుఁ బాండితి గలిగి 'భాషావిచిత్ర' ప్రియత వెలార్చు కూర్చిన యీ కృతిని శ్రీ రాముని కంకితముగావించిన ధన్యజీవి. ఇదిగాక-పతితపావనచరిత్రము అను ప్రశస్త ప్రబంధమును గూడ రచించియున్నాఁడు (చూ. డి. నం. 558). అందు

---

* తామరసనేత్ర ! నీవు రాధాప్రియుండ
వకట ! రాధేయుఁ జంపించు టర్హమగునె ? (శృం. నై. 8-135)
......పచ్చకప్పురపు వాసనతోడి ముఖారవింద తాం
బూలము మోవి మోవిపయి మోపుచు రాధకు నిచ్చు ధూర్తగో
పాలుఁడు ప్రోచుఁగాత ! (భీమ ; అవ - 3)

మానిత కవిత్వ కల్పనానల్ప శేముషీకౌశలుండ - అని తన కవితా సామర్థ్యమును బ్రకటించి, తన రచనా విధానము నవతారికలో నిట్టు లుల్లేఖించి యున్నాఁడు.

సీ. అత్యంత గూఢమై యర్థంబుగాని సం
దర్భంబు కవిత కొందఱకుఁ బ్రియము,
పోఁడిమి రెట్టింప వాడికెమాటలు
తెలుపైన కవిత కొందఱకుఁ బ్రియము,
సెలయేళ్లు దుమికిన చెలువున ఝంఝూళి (?)
తంబైన కవిత కొందఱకుఁ బ్రియము,
సరవి నశ్రుతపూర్వ శబ్దప్రయోగముల్
బెరసిన కవిత కొందఱకుఁ బ్రియము

తే. భువిని నిందఱ మనసురాఁ గవిత సెప్పి
మెప్పు గైకొనఁగ నశక్య మప్పసమున
దాఁచనేటికి, బుద్ధికిఁ దోఁచినటుల
రచనచేసెద వినరయ్య రసికులార !

ఇందలి గ్రంథాంత గద్య :

ఇది శ్రీదత్తాత్రేయయోగీశ్వర కరుణాకటాక్ష సాక్షాత్కృత విద్యానవద్య, సంస్కృతాంధ్రకవితా మాధుర్యధుర్య, కిచ్చనార్య నందన, వేంకటకవిసంక్రందన విరచితంబైన పతితపావనచరిత్రంబను మహాప్రబంధంబునందుఁ దృతీయాశ్వాసము.

ఈ యుభయ ప్రబంధములయందును కవియొక్క కాలమును బట్టి యిచ్చు సంశములు గానరావు.

తే. ఉదయగిరి నాక్రమించి మహోగ్ర తేజుఁ
డగుచు, భూచక్రపాలన మాచరించి,
యస్తగిరి నాక్రమించె నుద్యద్దినాధి
రాజు, రాజాధిరాజ పర్యాయముననుు (2-116).

ఈ పద్యము సూర్యాస్తమయ వర్ణనములోనిది. ఇందలి - ఉదయగిరి యాక్రమణము, మహాప్రతాపముతో భూచక్ర పాలనము, రాజాధిరాజ బిరుదవాచకము అనునవి కృష్ణదేవరాయలను స్ఫురింపఁజేయుచున్నవి. ప్రకృతమగు అస్తమయవర్ణనము (వస్తువు) చేత స్ఫురించు నలంకార (సమాసోక్తి) ధ్వని. కావున ఈ కవి కృష్ణరాయల నిర్యాణమును గాంచినవాఁడు కానోపును !

ఈ రాధామాధవసమాగమ ప్రబంధమునకు నాధారములయిన వ్రాఁతప్రతులు మా గ్రంథాలయమున రెండు గలవు. వాని వివరము లివి :

(1) డి. నం. 697, కాగితపుఁబ్రతి, పుటలు 111, బంతులు 18, వ్రాఁత యందమైనది. తప్పులు కలవు. గ్రంథపాతము గలదు. శైథిల్యము కానరాదు. ఈ ప్రతియొక్క ముఖపత్రమున సి. పి. బ్రౌను పండితుఁడు ఇట్లు వ్రాసియున్నాడు :

"This is copied from a manuscript in the Mackenzie Library. The poem is extreamely rare."

(2) డి. నం. 698 ; తాళపత్రప్రతి ; పత్రములు 148 ; బంతులు 5 ; సమగ్రము. వ్రాఁత తిన్ననిది. శైథిల్య గ్రంథపాతములు గలవు. ఇది పై కాగితపుఁబ్రతికి మాతృక. బ్రౌను పేర్కొనిన మెకంజీ గ్రంథాలయ ప్రతి యిది.

ఈ కావ్యపరిష్కరణమునకు మూలప్రతి యొక్కటియే యాధార మగుటచేత నెడనెడఁ గల స్వల్ప గ్రంథపాతములను గాని, యపపాఠము లను గాని సమగ్రముగా చక్కఁజేయ నసిపడలేదు. లేఖకప్రమాదములు యథాయోగ్యముగఁ బరిహరింపఁబడినవి. కుండలిత భాగములయందలి పదములను పూరణభాగములుగాఁ దెలియవలయును.

